नं० १२८

महाभाष्य प्रदीपम्

पत्राणि ८४

© Dharmartha Trust J&K. Digitized by eGangotri

नं०: १२८ महाभाष्यप्रदीपम्

पत्राणि ४४

भाष्यप्रदीपविवरणम्

महाभाष्यप्रदीपाख्यटीकासहितम् प्रथमाध्यायः

१म-२य आह्निकम्

१२८

© Dharmartha Trust J&K. Digitized by eGangotri



© Dharmartha Trust J&K. Digitized by eGangotri

ना॰ के॰

२

श्रीगणेशाय नमः ॥ ॐ नमः सरस्वत्यै ॥ सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियं ॥ सदसद्रूपतातीतमहं
शंकरमाश्रये ॥१॥ ज्ञानलोचनसंलक्ष्यं नारायणमजं विभुं ॥ प्रणम्य परमात्मानं सर्वविद्याविधायिनं ॥२॥ पु
रुषाः प्रतिपद्यन्ते देवत्वं यदनुग्रहात् ॥ सरस्वतीं च तां नत्वा सर्वविद्याधिदेवतां ॥३॥ पदवाक्यप्रमाणानां
पारं यातस्य धीमतः ॥ गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनं ॥४॥ महाभाष्यार्णवावारपारीणं विवृतिप्ल
वं ॥ यथागमं विधास्येऽहं कैयटो जैयटात्मजः ॥५॥ भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः ॥ छात्रा

श्रीः ॥ अथ शब्दानुशासनं ॥ अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते ॥

णामुपहास्यत्वं यास्यामि पिशुनात्मनां ॥६॥ तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ॥ क्रममाणः श
नैः पारं तस्य यास्यामि पंगुवत् ॥७॥ भाष्यकारो विवरणकारस्त्वाध्याकरणस्य साक्षात्प्रयोजनमाह ॥ अथ
शब्दानुशासनमिति। प्रयोजनप्रयोजनानि रक्षोहादीनि पश्चाद्वक्ष्यति। स्ववाक्यं व्याख्यातुमथशब्दं ताव
द्व्याचष्टे। अथेत्ययमिति। इतिशब्दोऽथशब्दस्य स्वरूपेऽवस्थापनाय प्रयुक्तः। एवं हि पदान्तरैः सामानाधिकरण्ये
न संबंधः स्यादथशब्दो व्याख्यातुं शक्यते। स्वरूपेऽवस्थितश्च सर्वनाम्ना परामृश्यते। अयमिति। शब्द इति स्वरूपक
थनं विस्पष्टप्रतिपत्त्यर्थं। अधिकारार्थ इति। अधिकारः प्रस्तावो ... स्य प्रयोजनमित्यर्थः। निपातानां द्योत

शिवः

२

© Dharmartha Trust J&K. Digitized by eGangotri

अथ शब्दस्याधिकारार्थत्वेयोर्थः संपद्यते तं दर्शयति । शब्दानुशासनमिति । अनेकक्रियाविषयस्यापि शब्दानु
शासनस्य प्रारभ्यमाणताथशब्दसान्निध्यानेद्योतयति । व्याकरणस्य वेदमन्वर्थं नाम शब्दानुशासनमिति । अ
त्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावान्नोभयप्राप्तौ कर्मणीत्यनेन न [illegible] षष्ठी । प्र
तिषेधः कर्तृकर्मणोः कृतीत्यनेनेति कर्मणि चेति समासप्रतिषेधप्रसंगादिध्मप्रव्रश्चनादिवत्समासः । श
ब्दशब्दस्य सामान्यशब्दत्वाद्विनाप्रकरणादिना विशेषे वृत्त्यनाभावात् [illegible] शब्दकाकवासितादीनामनुशासना

शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यं । केषां शब्दानां लौकिकानां वैदि
कानां च । तत्र लौकिकास्तावत् । गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति । वै
दिकाः खल्वपि । शन्नो देवीरभिष्टये । इषे त्वोर्ज्जे त्वा । अग्निमीळे पुरोहितं । अग्न आ
याहि वीतये ॥ ॥

नप्रसंगः इति मत्वा प्रश्नः । केषामिति । उत्तरपदार्थो निर्गलित्यापि पूर्वपदस्यं [illegible]
प्रविभागात्त्विन्नाप्रत्ययमर्थः । यथा राजपुरुष इत्युक्ते कस्य राज्ञ इति । सिद्धान्तवादी तु व्याकरणस्य वेदांगत्वा
त्सामर्थ्याद्विशेषावगतिरिति मत्वाह । लौकिकानामिति । लोके विदिता इति सर्वलोकलौकिकात् । अथवा मत्वार्थे
आत्माद्वित्वाद्वञ् । वेदेभवा वैदिकाः । वैदिकानामपि लौकिकत्वे प्राधान्यख्यापनाय पृथगुपादानं । यथा ब्राह्मणा आ
याता वसिष्ठोप्यायात इति वसिष्ठस्य [illegible] पातु प्राधान्यफलेनापभ्रंशपरिहारात् । अथवा भाषाशब्दानामेव लौ

© Dharmartha Trust J&K. Digitized by eGangotri

= अयं भावः। शब्दार्थयोस्तयो[illegible]। अत एव प्रबोधेऽपि समवायेन गो[illegible] विशेषणत्वात् [illegible] वाक्यबोधे पि स्फुटीतरा किं कथमिति आह न अर्थस्येव अर्थेऽस्मिन् [illegible] विशेषणं। आह च हरिः। न सोऽस्ति प्रत्ययो लोके यः [illegible] =
= [illegible] अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते। [illegible] एवं च गोत्वस्य गोशब्दस्य [illegible] विशेषणत्वात् [illegible] परमेश्वरनामभाव [illegible] पिनाकिनः =
= हिरण्यपूर्वं कशिपुं प्रचक्षते इत्यादि। एवं शब्दार्थयोरभेदेऽपि नेत्र [illegible] भिन्नत्वमिति न्यायात् [illegible] गुणो नाम [illegible] भिन्नत्वं चेति दिक्॥१ यत्तदिति [illegible]

भा० के०

इति

अयं गौरयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनात् तत्स्वरूपनिर्द्धारणाय पृच्छति। अथ केति। गौरिति

२

विज्ञाने प्रतिभाससमानेषु वस्तुषु कः शब्दः कोऽर्थः। तावेव वस्तुनि क्रमेण दर्शयति। किं यत्तदिति। उद्दिश्यमान

प्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गमुपाददते इति कामचारः। सम्प्रति पु

ल्लिङ्गेन निर्देशः। नेत्याह। नेति। भिन्नेन्द्रियग्राह्यत्वान्नैवं शब्द इति प्रतीतम्। पितुर्व्यामिति। यदि हि द्रव्यानु

२

शासनं विवक्षितमभविष्यत् अपद्रव्यानुशासनमित्येवावक्ष्यत्। अन्येन न्यायेन गुणक्रियासामा

= [illegible] इति भावः॥२

अयं गौरित्यत्र कः शब्दः। किं यत्तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः। ने

त्याह। द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः। नेत्याह। क्रिया ना

म सा। यत्तर्हि शुक्लो नीलः कपिलः कपोत इति स शब्दः। नेत्याह। गुणो नाम सः। यत्तर्हि भि

न्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः। नेत्याह। आकृतिर्नाम सा॥

। = अभेदसंभवादित्यर्थः। तेन न तद्भिन्नाभिन्नस्य तद्भिन्नत्वमिति न्यायेन शब्दत्वशंका

न्यानां निराकृतेः पिशाचलोपपञ्चार्थं तद्बोधपूर्वकं निराकरोति। यत्तर्हीति। गोशब्दार्थं चैषां संनवाच्यत्व[illegible]

शंकयते। परिहारस्तु पूर्ववत्। तत्रेङ्गितमभिप्रायसूचकशरीरव्यापारः। चेष्टितं कायपरिस्पन्दः। निमिषि

शिव

तमक्षिव्यापारः। शुक्लो नील इति। द्रव्यसमवायुपन्यासो गुणमात्राभिधायिनो [illegible] शुक्लादयो [illegible]व्याः। भिन्नेष्वभि

न्नमिति। अनेन सामान्यस्यैकत्वं कथ्यते। छिन्नेष्वच्छिन्नमिति। अनेन तु नित्यत्वं। सामान्यभूतमिति। सकारस्य सामान्यगोत्वा

२

देः सामान्यस्योपमानं निर्दिष्टं। सामान्यमिव सामान्यभूतं। न तु शब्दस्तूपमार्थो यथा पित्रनन्त इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

। वर्णव्यतिरिक्तं पदम् अनभ्युपगच्छन्नेकैकस्य वर्णस्य वाचकत्वं समुदायस्य वा । नत्वाद्यं दूषयति । द्वितीयेति । २ द्वितीयम् अपि दूषयति । आनर्थक्ये इति । ३ ॥ = प्रत्यायकानां वर्णानाम् अनेकत्वादेकवचनम् अनुपपन्नम् अत आह । वैयाकरणा इति । १

। प्रत्येकम् आनर्थक्ये हि समुदायस्य वाचकत्वम् अभ्युपेयं । तच्चानया युत्पद्यमानस्य अभिव्यज्यमानस्य वा न त्वाद्यं दूषयति । उत्पत्तिपक्षे इति । उभयत्र भावादित्यस्य समुदायाभावादित्यनेनान्वयः । द्वितीयं दूषयति । अभिव्यक्तीति । उत्पन्नाभिव्यक्तौ ध्वंसत्वादिति भावः । ३

। ननु पक्षद्वयेपि पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतानां पूर्ववर्णानुभवजन्य एकस्मृत्युपारूढानां वाचकत्वम् अस्त्वत आह । एकस्मृतीति । ४

द्रव्यादिषु निरस्तेषु पृच्छति । कस्तर्हीति । उत्तरम् आह । येनोच्चारितेनेति । वैयाकरणा वर्णव्यतिरिक्तस्य
पदस्य वाक्यस्य वा वाचकत्वम् इच्छन्ति । वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसं
गात् । आनर्थक्ये तु प्रत्येकम् उत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् । अभिव्यक्तिपक्षे च क्रमेणैवाभि
व्यक्तानां समुदायाभावाद् एकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्यविशेष

कस्तर्हि शब्दः । येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सं
प्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः । तद्य
था । शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति । ध्वनिं कुर्वन्न्
एवम् उच्यते । तस्माद् ध्वनिः शब्दः ॥ = ननु घटकारेणाप्यनुभूतवर्णास्तेनैव क्रमेण स्मृत्युपारूढानां वाचकत्वान्नार्थप्रतीत्यविशेषो भविष्यति । अन्यथा तथापि वर्णानां २

। = ननु स्फोटस्य नित्यत्वेन सर्वदार्थप्रतीतिप्रसंगः । तत्राह । नादेति । १ शब्दं कुर्विति ४ । इदम् एकं पदम् एकं वाक्यम् इति स्फोटस्तत्र तदेकत्वप्रमाणम् इति द्रष्टव्यम् अन्यथा सन्निवेशविशिष्ट
तत्तादिनाम् एतत्पदत्वाद्युपपत्तौ अतिरिक्तेनेकत्वनानात्वे । १

प्रसंगात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः । उच्चारितेनेति
प्रकाशितेनेत्यर्थः । अथवेति । अन्यत्र ध्वनिस्फोटरूपेण भेदस्य व्यवस्थापितत्वाद् इहाभेदेन व्यवहारे पि न
दोषः । द्रव्यादयो न शब्दवाच्याः तत्र तात्पर्यात् । ध्वनिं कुर्वन्न् इति । विधिनिषेधयोः प्रवृत्तविषयत्वाल्लोके
प्रमस्य त्रिभिः संबन्धः उच्यते । ध्वनिं कुर्वन्न् अपि तु च्यते विरामार्थं कार्यान्तान्निरन्तरयेत् तथा तन्निमित्तत्वेन

© Dharmartha Trust J&K. Digitized by eGangotri

।=हवोर्कंप्रयोजनप्रयोनंवरक्षादीनांनिर्वर्त्तकं॥ इति॥ शब्दज्ञानद्वारेण व्याकरणाध्ययनस्य नवहानमाभ्युदयावाप्तिहेतुः फलमनुमन्तव्यमिति भाष्याशयः॥१

भा॰ कै॰

काानि पुनरस्येति॥ किं संध्योपासनादिवद्व्याकरणाध्ययनं नित्यं कर्माहोस्वित्काम्यमिति प्रश्नः॥ पारंपर्येण पुरुषार्थसाधनतामस्याह॥ रक्षेति॥ लोकेलोपायदर्शनाद्वेदेष्वप्यन्यथामन्यते वैयाकरणः॥ वैयाकरणस्तु न भ्रमति॥ वेदार्थं चाध्यास्यति॥ तत्र लोपागमयोरुदाहरणं॥ देवा अदुह्रेति॥ दुहेर्लङि॥ तस्यादादेशे कृते लोपस्त आत्मनेपदेष्विति तलोपः॥ बहुलं छंदसीति रुटि सतिरूपमेतत्॥ वर्णविकारेण

पुरुषार्थो धर्मस्तत्साधनतां तत्प्रमाणतां पारंपर्येणागमव्यवधानेनेत्यर्थः॥१ वेदार्थं चेति॥ वेदार्थज्ञानेनानुष्ठानं तेन च फलसिद्धिः न कर्मानुष्ठानेन स्वर्गः॥ फलरूपार्थो व्याकरणाध्ययनस्य फलमिति भावः॥२ विकार इति॥ भा॰ वर्णेत्यादेशो विकारः

कानि पुनरस्य शब्दानुशासनस्य प्रयोजनानि॥ रक्षोहागमलघ्वसंदेहाः प्रयोजनं॥ रक्षार्थं वेदानामध्येयं व्याकरणं॥ लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति॥ ऊहः खल्वपि॥ न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदिताः॥ ते चावश्यं पुरुषेण यज्ञगतेन यथार्थं विपरिणमयितव्याः॥ तान्नावैयाकरणः शक्नोति विपरिणमयितुं॥ तस्मादध्येयं व्याकरणं॥

निपूर्वाद्ग्रहेर्घञ्विधायकाभावादाह॥ उदिग्रहस्येति॥३

भा॰ उज्ज्वाभं च निग्राभं चेति॥ हृग्रहोर्भश्छंदसि हस्येति वक्तव्यमिति भकारः॥ उदिग्रहस्य त्रउज्ज्वाभ निग्राभौ चच्छंदसि स्रुगुद्यमन निपातनयोरिति वचनात् उदि पूर्वाद्ग्रहेर्घञ्॥ ऊहः खल्वपीति॥ ऊह्यते यस्मिन्यागे प्रकृतिकर्तव्यता सोपदिष्टा यागांतरेणोपजीव्यासा प्रकृतिः॥ येनोपजीव्यते सा विकृतिः॥ प्रकृतिवद्विकृतिः कर्तव्येति मीमांसकैर्व्यवस्थापितेन्यायेन प्रकृतिप्रसयादीनामिह वैयाकरणः सम्यग्विजानाति॥ तत्राग्नेयं चोष्टि॥ अग्नये त्वा जुष्टं निर्वपामीति॥ तत्र सौर्ये

अस्मादेव निपातनात् ... ऊहो नाम ... स्यादर्थं तस्यावश्यं कर्त्तव्यम्

नन्वयत्र प्रकरणे येमंत्राः पठितास्तत्र तेषां तथैव प्रयोगः ... प्रयोजनं ... इति॥ यस्मिन्यागे पूर्वसूत्र्यभासरूपेण इति कर्त्तव्यता कथं कर्त्तव्यमित्याकांक्षायां संसर्गेण
गजात यागांतरेण सौर्यादिना ... विकृताविकर्षे ... पदार्थाः ... मंत्र इति
... प्रकृतिरूपाः ... वेदाननं मंत्रोधामस्य ... तेन ...

© Dharmartha Trust J&K. Digitized by eGangotri

शिवः

·नन्वस्य मागागमस्य व्याकरण[illegible] फलत्वमत आह·प्रयोजक इति·एवं नाध्ययादि त्वात्कर्तरि ... अत्र संदर्भ ... फलवत्त्वं ... प्रवर्तकं ... अध्येतव्यम् ... संदर्भेन नित्यानामपि ... पा

।=गुणानां परस्परसंबंधाभावात् अङ्गेषु प्रधानमित्यनुपपन्नमत आह·पदेति·२

आगम इति। प्रयोजकः प्रवर्तको नित्यतां व्याकरणाध्ययनस्य दर्शयति। प्रयोजनशब्देन च फलं प्रयोजकमुच्यते। निष्कारण इति। दृष्टकारणमनपेक्ष्येत्यर्थः। प्रधानं चेति। पदपदार्थावगमस्य व्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येति भावः। ब्राह्मणेनेति। अध्यापनं ब्राह्मणस्य वृत्तिः। न चा

=एतेन प्रधाने च कृतो यत्नः फलवान्भवतीति भाष्यस्य प्रधाने व्याकरणरूपे पदपदार्थावगमाय कृतो यत्नः फलवान्वाक्यार्थावगमेवाभवतीत्यर्थः सूचितः।१ अवश्यमित्यनेन न विवक्षितं दर्शयति। अध्यापनमिति·२

आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वं गेषु व्याकरणं। प्रधाने च कृतो यत्नः फलवान्भवति। लघ्वर्थं चाध्येयं व्याकरणं। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चांतरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुं। असंदेहार्थं चाप्यध्येयं व्याकरणं। याज्ञिकाः पठंति। स्थूलपृषतीमनड्वाहीमालभेतेति। तस्यां संदेहः। स्थूला चासौ पृषती च स्थूलपृषती। स्थूलानि पृषंति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासांतोदात्तत्वं ततस्तत्पु

·फलवाहेन वाक्यार्थावगम
·चेति·चने वाक्यं पदपदार्थ
·ज्ञानद्वारा वाक्यार्थज्ञानोपयो
·गीत्यर्थः।२

पञ्च

शब्दज्ञमुपाङ्क्षिप्यंति शिष्या इति। लघ्वर्थमिति। लाघवेन शब्दज्ञानमस्य प्रयोजनं। असंदेहार्थमिति। संदेहस्य प्रागभावो वा वेदितव्यः। न तु प्रध्वंसाभावः। न हि वैयाकरणस्य संशय उत्पद्य विनश्यति। इतरस्यैव तदुत्पादात्। स्वरत इति। पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थावसाय इत्यर्थः॥ ॥छ॥

=एतच्च कथं ततोऽनिश्चितार्थप्रतिपत्त्या इत्यादिना ... स्पष्टीकरिष्यते·५

·अधीतव्याकरणस्यापि नु क्वचित्संदेहेतन्दर्शे वैयाकरणमेवेति भावः।१

© Dharmartha Trust J&K. Digitized by eGangotri

... पं. ... पस्पशा

॰प्रयोगज्ञानाधीनत्वेनांतरंगत्वान्मुख्यत्वं शब्दापशब्दप्रयोगविधिनिषेधविषयत्वेन बहिरंगत्वादानुषंगिकत्वं वक्ष्यमाणानां॰१ ननु भूयः शब्दस्य वक्तव्यत्वे सति प्रयोजनानीत्यनेन सामानाधिकरण्यानुपपत्त्येकवचनमनुपपन्नमत आह॰ पुनरिति॰ भूयःशब्दस्य प्रवृत्तिनिमित्तभावः॥१

प्रकृतिमावेद

मुख्यानि प्रयोजनानि प्रदर्श्यानुषंगिकानि प्रदर्शयति॰ इमानि चेति॰ भूय इति॰ पुनरित्यर्थः॥ आनुषंगिकत्वाच्चैषां वर्गद्वयोपादानं॰ ते ऽसुरा हेलय इति॰ निंदार्थवादेन न म्लेछितवा इति म्लेछनं निषिध्यते॰ तत्र केचिदाहुः॰ हे हे प्रयोगे हेहयोरिति प्लुते कर्त्तव्ये तदकरणं म्लेछनं इति॰ परे द्विर्वचने कार्ये

॰हलो हेलादितेऽसुरा इत्यादिच॰२ ॰ननु भूयो परामर्षस्यापशब्दफलत्वा … वगतेः फलभावात् इति प्रश्ने यानि तिथि … मत आह॰ निंदार्थवादेनेति॰ अयमाशयः॥ पराभवस्यापभावता …

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि॰ तेऽसुराः॥ दुष्टः शब्दः॥ यदधीतं॥ यस्तु प्रयुंक्ते॥ अविद्वांसः॥ विभक्तिं कुर्वंति॥ यो वा इमां॥ चत्वारि॥ उत त्वः॥ सक्तुमिव॥ सारस्वतीं॥ दशम्यां पुत्रस्य॥ सुदेवोऽसि वरुणः इति॥ तेऽसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेछितवै नापभाषितवै म्लेछो ह वा एष यदपशब्दः॥ म्लेछा मा भूमेत्यध्येयं व्याकरणं॥ तेऽसुराः॥

वाक्यद्विर्वचनं लत्वं च म्लेछनमित्यपरे॰ न म्लेछितवा इत्यस्य पर्यायो नापभाषितवा इति॥ कृत्यार्थे तवैप्रत्ययः॥ म्लेछ इति कर्म्मणि घञ्॥

=निंदावचनान्म्लेछनमेत्यर्थः॥ निंदावशात्सद्बोधितविपरीतोच्चारणेन पापसाधनत्वात्॰ अतएव वक्ष्यमाणानां पर्वाणकार्वाणेनामेत्यनेन तयेन उपपन्नं भवति॰ अन्यथा पापाकृते …

[illegible]

दुष्टः शब्द इति। स्वरेण स्वरतः। आद्यादित्वात्तसिः। मिथ्याप्रयुक्त इति। यदर्थप्रतिपादनाय प्रयुक्तस्ततो
र्थांतरं स्वदोषात्प्रतिपादयन्नाभिमतमर्थं नाहेत्यर्थः। वागेव वज्रो हिंसकत्वात्। यथेंद्रशत्रुरिति स्वरदो
षाद्यजमानं हिंसितवानित्यर्थः। इंद्रस्याभिचारो रूपेण रब्धः। तत्रेंद्रशत्रुर्वर्धस्वेति मंत्र उच्चारि
तः। तत्रेंद्रस्य शमयिता शातयिता भवेति। क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढिशब्दः। तदाश्रयेण

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो य
जमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति॥ दुष्टाञ्शब्दान्मा प्रयुक्ष्म
हीत्यध्येयं व्याकरणम्। दुष्टः शब्दः। यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्ना
विव शुष्कैधो न तज्ज्वलति कर्हिचित्। तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्या

हि बहुव्रीहितत्पुरुषयोरर्थाभेदः। तत्र चेंद्रशमयितृत्वे सिद्धे सति इंद्रस्य शत्रुर्भवेत्यत्रार्थे प्रतिपाद्ये तोदा
त्ते प्रयोक्तव्ये आद्युदात्त ऋत्विजा प्रयुक्त इत्यर्थांतराभिधानादिंद्र एव वृत्रस्य शातयिता संपन्नः। इंद्रश
त्रुत्वस्य च विधेयत्वात्तं बाधनविभक्तेरनुवाद्यविषयत्वादित्यभावः। यथा राजा भव युध्यस्वेति। कृष्यमा
नस्य चामंत्रत्वाद्यज्ञकर्मणीति जपादिपर्युदासेन मंत्राणामेकश्रुतिविधीयमानेन भवति। अविज्ञातमि
ति। अविदितस्वरवर्णादिसंस्कारादर्थापरिज्ञानाच्च। निगदेनेति पाठमात्रेण। न तज्ज्वलतीति। निःफलं भवति। अ

© Dharmartha Trust J&K. Digitized by eGangotri

अदृष्टफलास्वागीहितः

भा॰के॰

५

यस्तुप्रयुंक्ते इति। अनेनाभ्युदयहेतुत्वं व्याकरणस्य दर्शयति। विशेषे इति। स एव शब्दः क्वचिद्[illegible]र्थे केनचिन्निमित्तेन प्रयुक्तः साधुः। अन्यथा त्वसाधुः। यथाश्वेऽश्वशब्दो धनाभावनिमित्तकः साधुः जातिनिमित्तकोऽसाधुः। गावि च गोणीशब्दः साधर्म्यात्प्रयुक्तः साधुः। जातिप्रयुक्तस्त्वसाधुः। क इति। वाग्योगविदः फलत्वाद्दोषदर्शनाच्च प्रश्नः। प्रष्टेव परमतमा

यस्तुप्रयुंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। कः। वाग्योगविदेव। कुत एतत्। यो हि शब्दान्जानाति अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः एवमपशब्दज्ञानेप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोपशब्दाः अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोपभ्रंशाः। तद्यथा। गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोपभ्रंशाः। अथ योऽवाग्योगवित्। अज्ञानं तस्य शरणं। विषम उपन्यासः।

शंकाह। वाग्योगविदेवेति। एवमपशब्दज्ञानेपीति। यथाश्लेष्मिकद्रव्यसेवयाश्लेष्मिको व्याधिर्भवति तद्विपरीतसेवया त्वारोग्यं। तथात्रापि विपर्ययो न्याय्यमिति भावः। भूयांसोल्पीयांस इति परस्परतापेक्षया प्रकर्ष[illegible] प्रत्ययः। यद्यपि नन्यसे बहवः शब्दाः अल्पे [illegible] पशब्दाः अंगमेय स्वत्वाच्च फलभेपस्त्वमिति तत्व्यस्माद्भूयांसोऽपशब्दाः अल्पीयांसः स्वशब्दाः। अज्ञानमिति। तथा च तिरस्कारो ब्रह्महत्यादिफलाभावः।

शिवः

५

© Dharmartha Trust J&K. Digitized by eGangotri

नासंतायेति। पुरुषाणां विधिप्रतिषेधयोरधिकारान्न परिज्ञाने प्रयत्नस्यान्याय्यत्वात्सुकरणात्तामर्थबलीयस्त्वा
त्। अवाग्योगविदिति। वाग्योगविन्नयत्नोपि शब्दान्प्रयुंक्ते नापशब्दानिति ज्ञानपूर्वकं योगादभ्युदयभाग्भवति। श्लो
कस्याप्रसिद्धत्वात्पृच्छति। क्व पुनरिति। प्रातिपदिकार्थप्रश्ने चात्र न तासर्थं किं तद्देशियत्रेदं पठितमिति। त्यर्थः। अत एव

नासंतायाज्ञानं शरणं भवितुमर्हति। योप्यज्ञानेन वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोपि
मन्ये पतितः स्यात्। एवं तर्हि सोनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः।
कः। अवाग्योगविदेव। अथ यो वाग्योगवित् विज्ञानं तस्य शरणं भवति। क्व पुनरिदं
पठितं। भ्राजा नाम श्लोकाः। किं च भोः श्लोका अपि प्रमाणं। किं चातः। यदि प्रमाणं अ
यमपि प्रमाणं भवितुमर्हति। यदुदुंबरवर्णानां घटीनां मंडलं महत्। पीतं न गमये
त्स्वर्गं किं तत्क्रतुगतं नयेत्। इति। प्रमत्तगीत एष तत्रभवतो यस्त्वप्रमत्तगीत
स्तत्प्रमाणं। यस्तु प्रयुंक्ते॥ ॥

श्लोका इति प्रथमांतेनोत्तरं। अन्यथा श्लोकेष्विति वक्तव्यं स्यात्। भ्राजो
क्त्वापरिज्ञानाद्धा। किंच भो इति। यदुदुंबरेति। अयं श्लोकः सौत्रामण्यां गे सुरापानस्य दुष्टत्वमजानानवयति। प्रमत्तगीत
इति। प्रमादेन विप्रतिपत्तत्वेन गीत इत्यर्थः। कात्यायनोपनिबद्धभ्राजाख्यश्लोकस्य तु प्रामाण्यमनुग्राहिकास्ति। एकः शब्दः स
म्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति।

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰ ६

के२ ६२

स्त्रीष्विवेति। प्रत्यभिवादे हि गुरुणा प्लुतः कार्यः। यस्तु प्लुतं कर्तुं न जानाति स स्त्रीवद्ब्रूयाय महमिति नत्वाभिवादे व
दतो [illegible] संस्कृतवाक्ये तेसर्पः प्रयाजा इति। प्रयाजमंत्राः [illegible] अग्निरित्यादिप्रकृतौ विभक्तियुक्ताः इत्यर्थः। य
थासमिधोग्न आज्यस्य व्यंतु अग्निरग्न इति। पदश इति। पदं पदमिति संख्यैकवचनाच्च वीप्सायामिति शस्। स्वर

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं व
देत्। स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं। अविद्वांसः। विभक्तिं कुर्वंति। याज्ञिकाः पठंति
ति। प्रयाजाः सविभक्तिकाः कार्या इति। न चांतरेण व्याकरणं प्रयाजाः सविभक्तिकाः
शक्याः कर्तुं। विभक्तिं कुर्वंति। यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधा
ति स आर्त्विजीनो भवति। आर्त्विजीनः स्यामेत्यध्येयं व्याकरणं। यो वा इमां। चत्वा
रि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो दे
वो मर्त्याँ आविवेश। चत्वारि शृंगाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। नि।

उदात्तादिः। अक्षरश इति। अक्षरं व्यंजनसहितो च। आर्त्विजीन इति। ऋत्विजमर्हति आर्त्विजीनो यजमानः। ऋत्विक्कर्मार्ह
तीति याजकोप्यार्त्विजीनः। यज्ञर्त्विग्भ्यां घखञाविति स्त्रत्रेण यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानं कर्तव्यमिति वा
र्तिकेन खञ्। विद्वान्यजेत विद्वान्याजयेदिति द्वयोरपि विदुषोरधिकारो [illegible] वा इति। शब्दस्य वृषभत्वेन निरूपणं।

शिवः ६

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयः काला इति। लडादिविषयाः। नित्यः कार्यश्चेति। व्यंग्यव्यंजकभेदेन। सप्त विभक्तय इति। सुप इत्यर्थः। केचित्तु तिङामप
रिग्रहप्रसंगात्सह शेषेण सप्त कारकाणि विभक्तिशब्दाभिधेयानीति व्याचक्षते। वर्षणादिति। कामानां ज्ञानपूर्व
कानुष्ठानफलत्वात्। महतेति। परेण ब्रह्मणेत्यर्थः। चत्वारीत्यनेनैकदेशेन वाक्यांतरमपि सूच्यत इत्याह। अप

त्रयो अस्य पादाः। त्रयः कालाः भूतभविष्यद्वर्त्तमानाः। द्वे शीर्षे। द्वौ शब्दात्मानौ। नित्यः
कार्यश्च। सप्त हस्तासो अस्य। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु ब
द्धः। उरसि कंठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्।
रौतिः शब्दकर्मा। महो देवो मर्त्यां आविवेशेति। महान् देवः शब्दः मर्त्याः मरणधर्मा
णो मनुष्याः। तानाविवेशेति। महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणं। अप
र आह। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि
निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति। चत्वारि वाक्परिमिता पदानि। चत्वारि
पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि विदुर्ब्राह्मणा ये मनीषिणः। मनस ईषि

र आहेति। परिमितानीति प्राप्ते शेश्छंदसि बहुलमिति शेर्लोपे परिमितेति भवति। परिमितानि परिच्छिन्नान्येता
वंत्येवेत्यर्थः। मनीषिशब्दः पृषोदरादित्वात्साधुः। कथं मनीषिण एव विदंतीत्याह॥

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰ के॰

७

गुहेति। अज्ञानमेव गुहा तस्यामित्यर्थः। सुपां सुलुगिति सप्तम्याः लुक्। व्याकरणप्रदीपेन तु ताः निष्प्रकाश्यन्ते। तत्र च तु
र्णां पदजातानां एकैकस्य चतुर्थं मनुष्या अवैयाकरणाः वदंति। नेंगयंतीत्यस्यैव व्याख्यानं न चेष्टंते न निमिषंती
ति। उत त्व इति। त्वशब्दोन्यवाची। उतशब्दोपि शब्दस्यार्थे स च भिन्नक्रमः। प्रत्यक्षेण शब्दस्वरूपमनुपलभमानोपि अ

गुहा त्रीणि निहिता नेंगयंति। गुहायां त्रीणि निहितानि नेंगयंति। न चेष्टंते न निमिषंती
त्यर्थः। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्त्तते चतुर्थमि
त्यर्थः। उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वं विस
स्रे जायेव पत्य उशती सुवासाः॥ अपि खल्वेकः पश्यन्न पश्यति। अपि खल्वेकः शृण्व
न्न शृणोति। एनामिति अविद्वांसमाहार्द्धं। उतो त्वस्मै तन्वं विसस्रे तन्वं विवृणुते। जा
येव पत्य उशती सुवासाः। तद्यथा। जायेव पत्ये कामयमाना सुवासाः स्वमात्मानं
विवृणुते। एवं वाक् वाग्विदे स्वात्मानं विवृणुते। वाङ्नो विवृणुयादित्यध्येयं व्याकर
णं। उत त्वः। सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः
सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि। सक्तुः सचतेर्दुर्धावो भवति कस

शिवः

७

अर्थापरिज्ञानान्न पश्यंतीत्यर्थः। उतो इति। उत उ इति निपातसमाहारः। अविद्वांसमाहार्द्धमिति। अहं विल
क्षणमर्द्धं चेमाहेत्यर्थः। सचतेरिति। षच सेचने इत्यस्य। दुर्धाव इति। दुःशोधः। यथा तितउना सक्तोः सुषाध्यपनीय
नेन तथा व्याकरणेनापशब्दा इत्यर्थः। कसतेरिति। पृषोदरादित्वाच्छब्दव्यत्ययः॥

© Dharmartha Trust J&K. Digitized by eGangotri

ततवदिति। विस्तारस्युक्तत्वात्सर्पः तुन्नवदिति। वकुद्धिद्रं धीरा इति। वैयाकरणाः। चैवांमक्रतेति। अपशब्देभ्यो विवि
क्तां कृतवंतः मंत्रे घसतिलेर्लुङि क्सस्य क्रतेतिरूपं। अत्रासखाय इति। ऋचितुनघेति दीर्घः सखायः समानख्या
तयो भेदग्रहस्य निवृत्तत्वात्सर्वमेकमितिमन्यंते। सख्यानीति साप्तपदीनं सख्यम्। एकागम्य इति। ज्ञानेनैव प्रा

तितउपरिपवनं भवति। ततवद्वा तुन्नवद्वा। धीरा ध्यानवंतो मनसा प्रज्ञानेन वाच
मक्रत अकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः संतः सख्यानि
जानते। क्व। य एष दुर्गो मार्गः एकगम्यो वाग्विषयः। के पुनस्ते। वैयाकरणाः। कुत एत
त्। भद्रैषां लक्ष्मीर्निहिताधि वाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मी
र्लक्षणाद्भासनात्परिवृढा भवति। सक्तुमिव। सारस्वतीं याज्ञिकाः पठंति। आहि
ताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। प्रायश्चित्तीया
मा भूमेत्यध्येयं व्याकरणं। सारस्वती। दशम्यां पुत्रस्य। याज्ञिकाः पठंति। दशम्युत्तर

यः वाचीति। वेदाख्ये ब्रह्मणि या लक्ष्मीर्वेदांतेषु परमार्थसंवित्स्वरूपा प्रकाशे षां निहितेत्यर्थः। प्रायश्चित्तीयामिति।
अयार्थे दृढूस्यः। प्रायश्चित्तीया इति। प्रायश्चित्तायपापक्षोभनाय क्रतिस्म निर्विहिताय कर्मणे हि तामास्तिन्ति नोऽस्मा
दनाः मा भूमेत्यर्थः। दशम्युत्तरकालमिति। दशम्या उत्तर इति पंचमीति योगविभागात्समासः। ततः कालग्रहणेन बहुव्री
हिः क्रियाविशेषणं चैतत्। दशदिनान्याप्नोचं भवतीति दशम्युत्तरकालमित्युक्तं यद्यपि गृह्यकाराः पठंति दशम्यां

© Dharmartha Trust J&K. Digitized by eGangotri

पा॰के
८

घोषवदादीति। घोषवंतो ये वर्णाः शिक्षायां प्रदर्शिताः तदादि। अंतरंतस्थमिति। मध्ये यरलवा यस्य तदित्यर्थः।
त्रिपुरुषानूकमिति। नामकरणे ऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यजि यत्त इति त्रिपुरुषा
नूकं। अन्येषामपि दृश्यते इति दीर्घः। सुदेवो ऽसीति। वरुणस्येयं स्तुतिः। यतो हेतोर्व्याकरण[illegible] ज्ञाना

घोषदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं
भवति द्व्यक्षरं चतुरक्षरं वा कृतं कुर्यान्न तद्धितमिति। न चांतरेण व्याकरणं कृतस्त
द्धिता वा शक्या विज्ञातुं। [illegible]पुत्रस्य। सुदेवो ऽसि वरुण यस्य ते सप्त सिंधवः। अ
नुक्षरंति काकुदं सूर्म्यं सुषिरामिव। सुदेवो ऽसि वरुण सत्यदेवो ऽसि यस्य ते स
प्त सिंधवः सप्त विभक्तयः। अनुक्षरंति काकुदं तालु। काकुर्जिह्वा सास्मिन्नुद्य
ते इति काकुदं। सूर्म्यं सुषिरामिव। तद्यथा। शोभनां सूर्मिं सुषिरामग्निरंतः प्रविश्य
दहति। एवं ते सप्त सिंधवः सप्त विभक्तयः ताल्वनुक्षरंति तेनासि सत्यदेवः। सरि

द्रुणस्स सदेवोसि ततो हेतोरन्येपि सत्यदेवा भवंतीत्यर्थः। सिंधव इति। नद्य इव विभक्तय इत्यर्थः। सास्मि
न्नुद्यत इति। अनेकार्थत्वाद्धातूनामुत्प[illegible]द्यत इत्यर्थः। अनुक्षरंतीति। ताल्वाश्रयप्रकाशंते इत्य
र्थः। सूर्म्यमिति। सूर्मीमिति प्राप्ते अमि पूर्व इत्यत्र वा छंदसीत्यनुवृत्त्यायमादेशः॥

श्रिन॰
८

© Dharmartha Trust J&K. Digitized by eGangotri

किं पुनरिति। ननु कानि पुनरस्येत्यनेन प्रश्नं स एव कथं पृच्छति किं पुनरिति। एवं मन्यते भाष्यकारः प्रयोजनान्याख्यान
स्य विषयविभागं दर्शयति। पुरा वेदाध्ययनात्पूर्वं व्याकरणमधीयते। ते बाल्यात्प्रभृति समर्था इति न प्रयोजनम
न्वाख्येयं। अद्यत्वे तु स्वल्पायुष्ट्वात्पूर्वं वेदं प्रधानमधीयते ततः प्रभुं समर्थं त्वा व्याकरणाध्ययनस्य प्रयोज

किं पुनरिदं व्याकरणमधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यद
पि किंचित्। ओमित्युक्त्वा वृत्तांतशः शमित्येवमादीन्शब्दान्पठंति। पुराकल्प एतदासी
त्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्रस्थानकरण
नादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यंते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता
वक्तारो भवंति। वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः। अनर्थकं व्याकरण
मिति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्रमन्वाचष्टे इमानि

नं पश्यंतीत्यवश्याख्येयं प्रयोजनं। न पुनरन्यदिति। वेदमप्यधिजिगांसमानेभ्य इत्यर्थः। ओमित्युक्त्वा इति। अभ्युपग
म्येत्यर्थः। वृत्तांतशः इति। वृत्तांतः प्रपाठक उच्यते। वृत्तांतं वृत्तांतं पठंतीत्यर्थः। अद्यत्वे इत्यव्ययं निपातोऽस्मिन्काले इत्य
र्थे वर्तते। त्वरिता इति। विवाहादौ॥

© Dharmartha Trust J&K. Digitized by eGangotri

उभयोपदेश इति। हेयोपादेयोपदेशे स्पष्टा प्रतिपत्तिर्भवतीत्युभयोपदेश उक्तो वितर्कः। यद्यपि प्रतिपत्तिः स्पष्टा गौ
रवं तु भवतीत्याह। अन्यतरेति। शब्दापशब्दयोरितरेतराभावरूपत्वादन्यतरान्यतरप्रशब्दावबुद्धो स्वभावाद्बहुविषयेति
डरणो वर्ज्यते। पंचेति। अर्थित्वात् ग्रहणं प्राप्तं पंचस्तु पंचनखेषु नियम्यमानं सामर्थ्यादन्येभ्यो निवर्त्तते। न त्वयं

उक्तः शब्दः स्वरूपमप्युक्तं। प्रयोजनान्यप्युक्तानि। शब्दानुशासनमिदानीं कर्त्तव्यं। कथं
कर्त्तव्यं। किं शब्दोपदेशः कर्त्तव्यः आहोस्विदपशब्दोपदेशः आहोस्विदुभयोपदेश इति।
अन्यतरोपदेशेन कृतं स्यात्। तद्यथा। भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। पंच
पंचनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन वा भक्ष्य
नियमः। तद्यथा। अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतदार
ण्यो भक्ष्य इति। एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते गौरित्युक्ते गम्यत एतद्
गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियते गाव्यादिषूपदिष्टेषु गम्यत एतद्गौ
रिति शब्द इति। किं पुनरत्र ज्यायः। लघुत्वाच्छब्दोपदेशः। लघीयांच्छब्दोपदेशः। गरीया

शिवब

विधिः। अप्राप्तेरभावात्। किंपुनरिति। उभयोपदेशाद्दूरोक्तं अपि प्रशस्योनयोः कोऽन्यायानिति सर्वः। इष्टेति। साधुशब्द
प्रयोगाद्धर्मो बाधेरित्यर्थः। अथवा उपादेयोपदेशात्तत्प्रतिपत्तिर्भवतीति भावः॥ ॥ श्रीः॥

© Dharmartha Trust J&K. Digitized by eGangotri

बृहस्पतिरिन्द्रायेति। प्रतिपदपाठस्याशक्यत्वं प्रतिपादयितुमयमर्थवादः। शब्दानामिति। शब्दपारायणशब्दो योगरूढः
शास्त्रविशेषस्य। तत्र प्रतिपदोक्तानामिति विशेषणमभिधानाय गम्यमानार्थस्यापि शब्दानामित्यस्य प्रयोगः।
एकदेशप्रयोगाद्दृष्टिर्लोके ऽप्रयुक्तमित्युच्यते। यथौषधसंस्कृतघृतमात्रे ऽकदेशप्रयोगे ऽप्रयुक्ते घृतमिति

अथैतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः। गौरश्वः
पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः। नेत्याह। अनभ्युपा
य एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षस
हस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता
इन्द्रोऽध्येता दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम। किं पुनरद्यत्वे यः सर्वथा
चिरंजीवति स वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन
स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति। तत्र चास्यागमकालेनैवायुः
पर्युपयुक्तं। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हीमे शब्दाः प्रतिप
त्तव्याः। किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्त्यं। कश्चिदुत्सर्गः कश्चिदपवादः। कथंजाती

व्यवहारः। तथेन्द्रेणेति प्रतिपादयति। चतुर्भिरिति। आगमकालो ग्रहणकालः। स्वाध्यायकालो ऽभ्यासकालः। प्रवच
नकालो ऽध्यापनकालः। व्यवहारो यज्ञकर्म्मणि। किंचिदिति। सामान्यविशेषो यस्मिन्नस्ति तत्सामान्यविशेषवत्। तत्कर्त
एष एव आज्ञानुपसर्गक इति॥ ॥५॥

×येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् किं पुनस्तत् उत्सर्गापवादौ ... × पं. ७

© Dharmartha Trust J&K. Digitized by eGangotri

सकलशास्त्रव्यवस्थैकतरपक्षाश्रयणेनाशिष्यत इति पक्षद्वयाश्रयणं प्रश्नपूर्वकं करोति किं पुनरिति। आकृतिप
क्षे केवले आश्रीयमाणे सरूपसूत्रं विप्रतिषेध इत्यादि नोपपद्यते केवलेऽपि व्यक्तिपक्षे पुनः प्रसंगविज्ञानादि न
घटते तस्माल्लक्ष्यप्रसिद्ध्यै क्वचित्कश्चित्पक्षः परिगृह्यते। जातिवादिनस्त्वाहुः। जातिरेव शब्दैः प्रति
पाद्यते व्यक्तीनामानन्त्यात् संबन्धग्रहणा[illegible]सम्भवात्। सा च जातिः सर्वत्रैकाकारप्रत्ययदर्शनाद् व्य
वसीयते। तत्र गवादयः शब्दा भिन्नद्रव्यसमवेतां जातिमभिदधति। तस्यां प्रतीतायां तदावेशात् तदवच्छिन्नं
द्रव्यं प्रतीयते। शुक्लादयः शब्दा गुणसमवेतां जातिमाचक्षते। गुणे तु तत्संबन्धात् प्रत्ययः। द्रव्ये संबन्धिसंबन्धात् सं

किं पुनराकृतिः पदार्थ आहोस्विद् द्रव्यं। उभयमित्याह। कथं ज्ञायते। उभयथा ह्याचार्येण
सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन् बहुवचनमन्यतर
स्यामित्युच्यते। द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते। किं पुनर्नित्यः
शब्द आहोस्वित्कार्यः॥

डित्थादिशब्दानामप्युत्पत्तिप्रभृत्याविनाशात् पिण्डस्य कौमारयौवनाद्यवस्थाभेदेऽपि
स एवायमित्यभिन्नप्रत्ययनिमित्तं डित्थत्वादिका जातिर्वाच्या। क्रियास्वपि जातिर्विद्यते सैव धात्वर्थः। व्याप
ठति पठतीत्यादेरभिन्नस्य प्रत्ययस्य सद्भावात् [illegible] जातिसमुपगमः॥ व्यक्तिवादिनस्त्वाहुः॥ शब्दस्य व्य
क्तिरेव वाच्या, जातेस्तूपलक्षणभावेनाश्रयणादानन्त्यादिदोषाभाव इत्याहुः॥ किं पुनरिति। विप्रतिपत्त्याशं
सयः। केचिद्ध्वनिव्यंग्यं वर्णात्मकं नित्यं शब्दमाहुः॥ अन्ये वर्णव्यतिरिक्तं पदस्फोटं नित्यं। केचिद्वाक्यस्फोटमपरे संगिरं

श्रियः

© Dharmartha Trust J&K. Digitized by eGangotri

संग्रह इति। ग्रन्थविशेषे। कथं पुनरिति। किमाचार्य एवास्य शब्दार्थसंबन्धानामपि स्मर्तेति प्रश्नः। सिद्ध इति। तत्र नित्यः स्फोटः शब्दो जातिस्फोटलक्षणः व्यक्तिस्फोटलक्षणो वा। कार्यशाब्दिकानामपि मते प्रवाहनित्यत्वं तथा। अर्थस्यापि जातिलक्षणस्य नित्यत्वं। द्रव्यपक्षेपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्मतत्वं वाच्यमिति नित्यता प्रवाहनित्यता वा। संबंधस्य व्यवहारः ... व्यवहारपरंपरया

संग्रह एतत्प्राधान्येन ... परीक्षितं नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः। यद्येव नित्यः अथापि कार्यः। उभयथापि लक्षणं प्रवर्त्यमिति। कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तं। सिद्धे शब्दार्थसंबंधे। सिद्धे शब्दे अर्थे संबंधे चेति। अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत्कूटस्थेष्वविचालिषु ... वर्त्तते। तद्यथा। सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति। ननु च भोः कार्येष्वपि ... वर्त्तते। तद्यथा सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति। यावता कार्येष्वपि वर्त्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणं न पुनः कार्ये यः सिद्धशब्द इति॥

अनादित्वान्नित्यता। सिद्धशब्दस्य नित्यानित्ययोर्दर्शनात्पृच्छति। अथेति। नित्येति। नित्यलक्षणस्यार्थस्य पर्यायेण वाचकस्तमेवार्थं कदाचिन्नित्यशब्द आह कदाचित्सिद्धशब्द इत्यर्थः। कूटस्थेष्विति। अविनाशिषु। अविचालिष्विति। देशांतरप्राप्तिरहितेषु। ननु चेति। सिद्धशब्दः क्रियानिष्पन्नोप्यर्थो वगम्यत इत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

ते ग्र होप्याश्रीकृतो लद्दपश्रीकातीको ग्रंथः वि०

मा० के०

११

संग्रहे तावदिति। तत्रेदिति किं कार्यः शब्दोऽथ सिद्ध इति पक्षद्वयविचारः। तत्र कार्यप्रतिपत्त्यर्थाभिधायी सामर्थ्यात्सि
द्ध इति स्थितं। तत्समानं तं त्रसादिहापि तथैव युक्तमित्यर्थः। अथवेति। एवशब्द प्रयोगे द्विपदमवधारणं। द्योतकत्वेन
एवशब्दस्यापेक्षणात्। यदा तु द्योतकमंतरेण सामर्थ्यादवधारणं गम्यते न दा तदेकपदमित्युच्यते। तत्र सर्व एवा
वो भक्षयतीत्यभक्षश्रुतिः सामर्थ्यान्नियममवगमयत्यप एव भक्षयतीति। इहापि नित्यानित्यव्यतिरेकेणारम्भं
तराभावात् सिद्धशब्दोपादानान्नियमोऽवगम्यते सिद्ध एवेति। कार्याणां तु पदार्थानां प्रागभावप्रध्वंसाभावयोरपि

संग्रहे तावत्कार्यप्रतिद्वंद्वभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदे
व। अथवा संत्येकपदान्यप्यवधारणानि। तद्यथा। अब्भक्षो वायुभक्ष इति। अप एव भक्ष
यति। वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव न साध्य इति। अथवा पूर्वप
दलोपोऽत्र द्रष्टव्यः। अत्यंतसिद्धः सिद्ध इति। तद्यथा देवदत्तो दत्तः सत्यभामा भामेति। अ
थवा व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति। नित्यपर्यायवाचिनो ग्रह

सतात् — सिद्धता नास्तीति न तेऽपि सिद्धा एवेति। अथवेति। कथं पुनर्देवदत्तशब्दे संज्ञात्वेन विनियुक्ते एकदेशः प्रयुज्यते न
घ सो संज्ञात्वेन विनियुक्तः। न चैकदेशात्समर्प्यमाणस्य समुदायस्य वाचकत्वमुपपद्यते। प्रतीयमानस्य प्रत्याय्यकत्वा
संभवादुच्चार्यमाणस्यैव वाचकतात्। एवं तर्हि नु निष्पादितेन्द्रायसरूपाः संज्ञा विनियोगकाले विनियुक्ता एव। लोपस्तु
लोपस्तु वर्णानां साधुत्वं मा भूदित्यन्वाख्याते। इहापि नित्यानित्ययोर्निष्पन्नत्वाविशेषात् सिद्धश्रुतिरूपात्तप्रकर्षं गम
यति। अत्यंतसिद्ध इति। न्यायाद्या नित्यत्वं शब्दादीनां स्थितमित्याह। अथवेति। नहि संदेहमात्रादलक्षणता भवति पुनः प्रमा

शिवः

११

© Dharmartha Trust J&K. Digitized by eGangotri

वर्ण्येनेति। प्रयत्नव्याख्यातव्यमित्यर्थः। मांगलिक इति। अगार्हिताभीष्टार्थसिद्धिर्मंगलं। तत्प्रयोजन आचार्यो मांगलिकः। प्र
थन्ते इति। अध्ययनस्याविच्छेदात्। वीरपुरुषाणीति। आन्तराणां परैरपराजयात्। आयुष्मत्पुरुषाणीति। शास्त्रानुष्ठाने ध
र्मोपचयादायुर्वर्द्धनात्। सिद्धार्था इति। अध्ययननिष्पत्तिरेषां सिद्धिः। नावश्यमिति। तल्लब्धाभीक्ष्ण्येन येन शब्दः प्रयुक्तं

किं पुनरनेन वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसंदे
हः स्यात्। मंगलार्थं। मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः
प्रयुङ्क्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च
अध्येतारश्च [illegible] सिद्धार्था यथा स्युरिति। अयं खल्वपि नित्यशब्दो नावश्यं कूटस्थेष्व
विचालिषु भावेषु वर्त्तते। किं तर्हि। आभीक्ष्ण्येपि वर्त्तते। तद्यथा। नित्यप्रहसितो नित्यप्रजल्पि
त इति। यावता आभीक्ष्ण्येपि वर्त्तते। तत्राप्यनेनैवार्थः स्यात्। व्याख्यानतो विशेषप्रतिप
त्तिर्न हि संदेहादलक्षणमिति। पश्यति त्वाचार्यो मंगलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो
भविष्यति शक्ष्यामि चैनं नित्यपर्यायं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्य
शब्दः। अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबंधे चेति। आकृति
मित्याह। कुत एतत्। आकृतिर्हि नित्या। द्रव्यमनित्यम्। ११

ते। आगोपालांगनं तेषामेवात्वात्वास्त्रथानं
स्यात्तन्न विरलप्रयोगाणां विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते। यथा आश्चर्यमनित्ये नित्यवी

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰कै॰

र्थ

अर्थसंबंधे चेति। द्रव्यपक्षे द्रव्यस्याग्रहणाद् ग्रहणं संबंधविशेषणार्थमुपात्तं। अनित्येन कथं संबंधस्य नित्यतेति चेत्। यो
यतालक्षणत्वात्संबंधस्य। तेसम्बि शब्दाश्रयत्वात् शब्दस्य च नित्यत्वाददोषः। द्रव्यं हि नित्यमिति। असत्योपाध्यवच्छिन्नं ब्र

१२

अथ द्रव्ये पदार्थे कथं विग्रहः कर्त्तव्यः। सिद्धे शब्दे अर्थे संबंधे चेति। नित्यो ह्यर्थवतामर्थैरभि
संबंधः। अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः। सिद्धे शब्देऽर्थसंबंधे चेति। द्रव्यं हि नित्यं
आकृतिरनित्या। कथं ज्ञायते। एवं हि दृश्यते लोके। मृत्कयाचिदाकृत्या युक्ता पिंडो भव
वति। पिंडाकृतिमुपमृद्य घटिकाः क्रियंते। घटिकाकृतिमुपमृद्य कुंडिकाः क्रियंते। तथा
सुवर्णं कयाचिदाकृत्या युक्तं पिंडो भवति। पिंडाकृतिमुपमृद्य रुचकाः क्रियंते। रुचकाकृ
तिमुपमृद्य कटकाः क्रियंते। कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियंते। पुनरावृत्तः सुव
र्णपिंडः पुनरपरया आकृत्या युक्तः खदिरांगारसदृशे कुंडले भवतः। आकृतिरन्या चा
न्या च भवति द्रव्यं पुनस्तदेव। आकृत्युपमर्द्देन द्रव्यमेवावशिष्यते। आकृतावपि पदार्थे
एष विग्रहो न्याय्यः। सिद्धे शब्देऽर्थसंबंधे चेति। ननु चोक्तमाकृतिरनित्येति। नैतदस्ति।
नित्या आकृतिः। कथं। न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता शिवः

त्ततत्त्वं शब्दवाच्यमित्यर्थः। आकृतिरिति। सं
स्थानं। ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वं। आत्मैवेदं सर्वमिति श्रुतिवचनात्। न क्वचिदुपरतेति। अननित्य
त्वेत्यर्थः। अद्वैतेन लोकव्यवहाराभावात् व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वम्॥ ॥श्रीः राम॥ ॥ १२

द्रव्य

© Dharmartha Trust J&K. Digitized by eGangotri

अथवेति। असत्यत्वेपि तत्त्वतो लोकव्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते। त्रिविधा चानित्यता। संसर्गानित्यता। यथा स्फटिकस्य लाक्षाद्युपधाने सति स्वरूपतिरोधानेन पररूपभासः। उपाधानापगमे स्वरूपप्रतिभासः। परिणामानित्यता। यथा बदरफलस्य श्यामताया तिरोभावे लौहित्यस्याविर्भावः। प्रध्वंसानित्यता सर्वात्मना विनाशः। एतत्त्रिविधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपादयितुमुक्तं ध्रुवमित्यादि। तत्र ध्रुवं कूटस्थ

अथवा नेदमेव नित्यलक्षणं। ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनु
त्पत्त्यवृध्यव्ययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं
न विहन्यते। किं पुनस्तत्त्वं। तद्भावस्तत्त्वं। आकृतावपि तत्त्वं न विहन्यते। अथवा किं न
एतेन इदं नित्यं इदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्दे
अर्थे संबंधे चेति। कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः संबंधश्चेति। लोकतः। यल्लोकेर्थ

मर्घ्य

मुपादाय शब्दान्प्रयुंजते नैषां निर्वृत्तौ यत्नं कुर्वंति। ये पुनः कार्या भावाः निर्वृत्तौ तेषां
यत्नः क्रियते। तद्यथा। घटेन कार्यं करिष्यन्कुंभकारकुलं गत्वाह कुरु घटं कार्यमनेन
न करिष्यामीति। न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान्प्रयो

मिति संसर्गानित्यतापरिहृता। अविचालीति परिणामानित्यता। अनपायेत्यादिना प्रध्वंसानित्यता। यन्नित्यमिति। बुद्धिप्रति
भासः शब्दार्थः। यद्यद्यदा शब्द उच्चारितस्तदा तदाकारा बुद्धिरुपजायत इति प्रवाहनित्यत्वादर्थस्य नित्यत्वमित्यर्थः। लोक
त इति। अन्यथा कार्येषु वस्तुषु लोकव्यवहारोन्यथा नित्येषु शब्देषु व्यवहारो नादिवृद्धपरंपरायुक्तसंकेतपूर्वक इति शब्दादीनां

© Dharmartha Trust J&K. Digitized by eGangotri

तावत्सेवार्थमिति। कुत्रावस्थानिरूप्यत इत्यर्थः। अत्रभाष्यकारेणसंभवंतीमप्येकवाक्यतामनाश्रित्यवाक्यत्रयंव्यवस्थापितं। सि
द्धेशब्दार्थसंबंधेशास्त्रंप्रवर्त्तनित्येकंवाक्यं। कथंज्ञायतइतिप्रश्नेलोकतोज्ञायतइतिद्वितीयं। लोकतइत्यस्यार्थस्यालोकतो
र्थप्रयुक्तेइत्यादितृतीयं। शब्दप्रयोगइति। प्रयोगग्रहणेनप्रयोगाद्धर्मोनतुज्ञानमात्रादित्युक्तंभवति। अर्थेनआत्मप्रत्या
यनायप्रयुक्तोर्थप्रयुक्तः। धर्मायनियमइति। चतुर्थ्यातादर्थ्यंप्रतिपाद्यते। संबंधसामान्येतुषष्ठीविधायसमासःकर्त्त

तावत्सेवार्थमुपादायशब्दान्प्रयुंजते। यदितर्हिलोकएषुप्रमाणं किंशास्त्रेणक्रियते
। लोकतोर्थप्रयुक्तेशब्दप्रयोगेशास्त्रेणधर्मनियमः। लोकतोर्थप्रयुक्तेशब्दप्रयोगेशा
स्त्रेणधर्मनियमःक्रियते। किमिदंधर्मनियमइति। धर्मायनियमोधर्मनियमः। ध
र्मार्थोनियमोधर्मनियमः। धर्मप्रयोजनोवानियमोधर्मनियमः। यथालौकिकवैदि
केषु। प्रियतद्धितादाक्षिणात्याः। यथालोकेवेदेचेतिप्रयोक्तव्येयथालौकिकवैदिके
ष्वितिप्रयुञ्जते॥ ॥सू॥ श्रीः॥

13

धीवा

व्यः। चतुर्थीसमासस्यप्रकृतिविकारभावएवविधानात्। धर्मार्थइति। धर्मार्थत्वान्नियमएवधर्मशब्देनाभिधीयतइतिकर्म
धारयःसमासः। धर्मप्रयोजनइति। लिङ्गादिविषयेननियोगास्वेनधर्मेणप्रयुक्तइत्यर्थः। प्रियतद्धिताइति। नायमपशब्दः। किं
तुयेलोकवेदयोर्भेदावयवास्तेलोकवेदशब्दाभ्यामभिधातुंशक्यंते। आधाराधेयभावकल्पनया। लतद्धितप्रयोगः प्रि
यतद्धितत्वनिमित्तः। यथाकश्चिद्धनस्यतयइतिप्रयुङ्क्ते। कश्चिद्धनस्यत्यमितिसम्प्रत्ययांतम्॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथवेति। नात्रावयवावयविविभागः किंतर्हि लोकवेदयो[illegible]र्व्यतिरिक्तोऽसिद्धांतराशार्थोऽभवरूपइत्यर्थः। लौकिकः स्मृत्युपनिबद्धः।
वैदिकः श्रुत्युपनिबद्धः। एकंचानेनेति। एकेः कर्मसामान्योक्तिर्लिंग सर्वनामनपुंसकयुक्तेक्तप्रत्ययः। ततः पदांतरसंबंधात्पु

अथवायुक्तएवात्र तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतांतेषु। लोके तावदभक्ष्योग्राम्य
कुक्कुटः। अभक्ष्योग्राम्यसूकरइत्युच्यते। भक्ष्यंचनामक्षुत्प्रतिघातार्थमुपादीयते। शक्यंचानेन
श्वमांसादिभिरपिक्षुत्प्रतिहंतुं तत्र नियमः क्रियते। इदंभक्ष्यमिदमभक्ष्यमिति। तथा खेदात्स्त्रीषु
प्रवृत्तिर्भवति। समानश्चखेदविगमोऽगम्यायांगम्यायांचेति तत्र नियमः क्रियते। इयंगम्येयम
गम्येति। वेदेखल्वपि। पयोव्रतो[illegible]ब्राह्मणः यवागूव्रतोराजन्यः आमिक्षाव्रतोवैश्यइत्युच्यते
व्रतंचनामाभ्यवहारार्थमुपादीयते। शक्यंचानेनशालिमांसादीन्यपिव्रतयितुं तत्र नियमः क्रि
यते। तथा बैल्वः खादिरोवायूपः स्यादित्युच्यते। यूपश्चनामपश्वनुबंधार्थमुपादीयते। शक्यंचा
नेन किंचिदेवकाष्ठमुच्छ्रित्यानुच्छ्रित्यवापशुरनुबंधुं तत्र नियमः क्रियते। तथाऽग्नौकपालान्यधि
श्रित्याभिमंत्रयते भृगूणामंगिरसांघर्मस्य तपसा तप्यध्वमिति। अंतरेणापि मंत्रमग्निद
नकर्मोकपालानि संतापयति। तत्र च नियमः क्रियते। एवं क्रियमाणं

पज्जायमानमपिस्त्रीत्वंबहिरंगत्वादंतरंगसंस्कारं
नबाधतेइतिशक्यंत्वदित्युक्तं। यद्यत्तुपूर्वमेवविशेषविवक्षातदाशक्यात्वदित्येवभवति। यद्वाक्षुत्प्रतिघातस्य वस्तुत्कर्मशक्रेस्त
प्रतिघातस्तदाक्षुधंप्रतिहंतुंशक्यमितिभवति। खेदादिति। खेदयतीतिखेदोरागः। इंद्रियनियमासामर्थ्यं वाखेदः। पयोव्रतइति
। सत्यामर्थितायांपयएवव्रतयतीतिसामर्थ्याल्लियमोयंनतुविधिः। अर्थिताभावेकार

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰के॰

यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति यदि सन्ति नाप्रयुक्ताः अथाप्रयुक्ता न सन्ति
सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् =४

१४

समानायामिति। यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययंति। केचिच्चापभ्रंशाः परंपरया निरूढिमागताः साधुशब्दान्न स्मारयंत एव तमर्थं प्रत्याययंति। अन्ये तु मन्यंते साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचका इति। अस्त्यप्रयुक्त इति। प्रयोगमूलत्वादस्याः स्मृतेः अप्रयुक्तानामन्वाख्यानस्याप्रामाण्यमाशंक्यते। यथा यदादीनां वि

एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते। शब्देनैवार्थोऽभिधे

यो नापशब्देनेति। एवं हि क्रियमाणमभ्युदयकारि भवतीति। अस्त्यप्रयुक्तः। सन्ति वै शब्दा अप्रयु

क्ताः। तद्यथा। ऊषतेरचक्रपेचेति। किमतो यत्सन्त्यप्रयुक्ताः। प्रयोगाद्धि भवाञ्छब्दानां साधुत्वम

ध्यवस्यतीति। य इदानीमप्रयुक्ताः नामी साधवः स्युः। इदं विप्रतिषिद्धं प्रयुञ्जान एव खलु — भावेन

भवानाह सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे

साधुः स्यात्। नैतद्विप्रतिषिद्धं। सन्तीति तावद्ब्रूमः। यदेताञ्छास्त्रविदः शास्त्रेणानुविदध

ते। अप्रयुक्ता इति ब्रूमः। यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते कश्चेदानीं भवज्जाती — भवतो।

यकोऽन्यैः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति। किं तर्हि लोके

प्रयुक्ता इति। ननु च भवानप्यभ्यन्तरो लोके। अभ्यन्तरोऽहं लोके न त्वहं लोकः॥ — शिवः।

भाष्यपर्यक्रियया सत्वं गम्यते नैवं शब्दानां तद्धि सर्वदा व्यवहारायाप्रयुज्यमानाः सन्तः सत्वेनावसीयंत इत्यादि। इदानीमिति। कश्चेदा — १४

नीमिति। उपहासपरं। उत्तरं तु शास्त्रदृष्ट्या प्रकृतिप्रत्ययादिसंभवादनुमितत्वात् व्यवहारे तु न दृश्यंत इत्युक्तं न त्वहं लोक इति। यथा

लोकोऽर्थावगमाय शब्दं प्रयुंक्ते नैवं भवान् ये तेऽर्थे युज्यंते ऽपि तु स्वरूपपदार्थका इत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

अर्थे शब्दप्रयोगादिति। अर्थसद्भावः शब्दप्रयोगे लिंगं न हि विना शब्देनार्थप्रत्यायनमुपपद्यते। इतरो ऽन्यथासिद्धत्वात्। अप्रयोग इति। यतोन्ये तेषामर्थानां संति वाचकास्ततो नेषामनुमानमुपपद्यते। यद्यप्यूषित्यस्य उषिता इति समानार्थेन भवतिपरे

अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्। अस्त्यप्रयुक्त इति चेत्तन्न। किं कारणं। अर्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यंते। संति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यंते। अप्रयोगः प्रयोगान्यत्वात्। अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थे ऽन्याञ्छब्दान्प्रयुंजते। तद्यथा। ऊषेत्यस्यार्थे क्व यूयमुषिताः। तेरेत्यस्यार्थे क्व यूयं तीर्णाः। चक्रेत्यस्यार्थे क्व यूयं कृतवंतः। पेचेत्यस्यार्थे क्व यूयं पक्ववंतः इति। अप्रयुक्ते दीर्घसत्त्रवत्। यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः। तद्यथा। दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। न चाद्यत्वे कश्चिदपि व्यवहरति। केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधति। सर्वे देशांतरे। सर्वे खल्वप्येते शब्दा देशांतरेषु प्रयुज्यंते। न चैवोपलभ्यंते। उपलब्धौ यत्नः क्रियतां। महान् शब्दस्य प्रयोगविषयः॥ श्री॥

कृतादेर्विशेषस्यानवगमात्तत्प्रतिपादनाय [illegible] पदांतरसहितः प्रयुज्यते। संप्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वादनुशासनं कर्तव्यमित्याह॥ अप्रयुक्ते इति। ऋषिसंप्रदाय इति। वेदाध्ययनमित्यर्थः। सर्व इति। इदं तत्र तात्पर्यं [illegible]
स्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न व्यवतिष्ठेते अपि तु शिष्टानामाचारात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

वाकोवाक्यमिति। वाकोवाक्यप्रश्नोक्तिप्रत्युक्तिरूपो ग्रन्थ उच्यते। यथा किंस्विदावपनं महत्। भूमिरावपनं महदिति। पूर्व
पूर्वचरितसंकीर्तनमितिहासः। वंशाद्यनुकीर्तनं पुराणं। विकार इति। जीवलोमलतावस्था विकारस्तत्रे सर्पः। किंपुनरि

सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्याः बहुधा भिन्नाः एकशतमध्व
र्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्य
मितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावंतं शब्दस्य प्रयोगवि
षयं अननुनिशम्य संत्यप्रयुक्ता इति वचनं केवलं साहसमात्रमेव। एतस्मिंश्चातिमह
ति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यंते। तद्यथा। शवतिर्ग
तिकर्मा कंबोजेष्वेव भाषितो भवति। विकार एनमार्या भाषंते शव इति। हंमतिः सुराष्ट्रेषु
रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुंजते। दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु
ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते। क्व वेदे। सप्तास्ये रे
वती रेवद्भूष। यद्वो रेवती रेवत्यं तदूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र। यत्रा नश्चक्रा जरसं त
नूनामिति। किंपुनः शब्दज्ञाने धर्म आहोस्वित्प्रयोगे। कश्चात्र विशेषः॥

ति। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिः। तत्र किं शब्दज्ञानतः कामधुग्भवति सुप्रयुक्तत्व
व्यगलातत्वानुमानमित्यर्थः। आहोस्वित्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्तत्वस्य सम्यग्ज्ञानादित्यर्थ इति प्रश्नः॥ श्रीः॥

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञाने धर्म इति चेदिति। यथा श्लेष्मणः प्रकोपनं क्षीरादि द्रव्यं रूक्षं तु वायोस्तथेहापि प्राप्तमिति भावः। आचार इति। प्रयोगे। ऋषिर्वेदः। न च प्र

ज्ञाने धर्म इति चेत्तथाधर्मः। ज्ञाने धर्म इति चेत्तथाऽधर्मः प्राप्नोति। यो हि शब्दाञ्जानात्यपशब्दानप्यसौ

जानाति। यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेप्यधर्मः प्राप्नोति। अथवा भूयानधर्मः प्राप्नोति। भूयां

सोऽपशब्दाः अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा। गौरित्यस्य गावी गोणी गोता

सपत्र गोपोतलिकेत्येवमादयोऽपभ्रंशाः। आचारे नियमः। आचारे पुनरृषिर्नियमं वेदयते। तेऽसुरा हे

लयो हेलय इति कुर्वन्तः पराबभूवुरिति। अस्तु तर्हि प्रयोगे। प्रयोगे सर्वलोकस्य। यदि प्रयोगे ध

र्मः सर्वो लोकोऽभ्युदयेन युज्येत। कश्चेदानीं भवतो मत्सरः यदि सर्वो लोकोऽभ्युदयेन युज्येत। न ख

लु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यं। न च प्रयत्नः फला

द्व्यतिरेच्यः। ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यंते। अत एव साधीयोऽभ्युदयेन योक्ष्यं

ते। व्यतिरेकोऽपि वै लक्ष्यते। दृश्यंते हि कृतप्रयत्नाश्चाप्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात्। ए

वं तर्हि नापि ज्ञान एव नापि प्रयोग एव। किं तर्हि शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन

शास्त्रपूर्वकं यः शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्यते तत्तुल्यं वेदशब्देन। वेदशब्दा अप्येवमभिवदंति

यत्न इति। यदि प्रयत्नेन विनापि फलं स्यात् प्रयत्नवैयर्थ्यमापद्येतेत्यर्थः। व्यतिरे यो ग्निष्टोमेन यजेत। य उ चैनमेवं वेद। योग्निं

क इति। परिहारः। तत्तुल्यमिति। वेदशब्दोदायस्यार्थस्य स वेदशब्देन तस्य यथा ज्ञातानुष्ठानं तथा शब्दानामपि प्रकृत्यादिविभागज्ञानपूर्वकः

© Dharmartha Trust J&K. Digitized by eGangotri

अपर आह इति। वेदश्चासौ शब्दश्च वेदशब्द इति कर्मधारयः। अथवेति। अपशब्दज्ञानानान्तरीयकत्वाच्छब्दज्ञानस्य पृथक्फलमपश

अपर आह। तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति एवं यः शास्त्रपू
र्वकं शब्दान्प्रयुंक्ते सोऽभ्युदयेन युज्यत इति। अथवा पुनरस्तु ज्ञान एव धर्म इति। ननु चोक्तं ज्ञाने धर्म इति
[illegible] चेत्तथाऽधर्म इति। नैष दोषः। शब्दप्रमाणका वयं। यच्छब्द आह तदस्माकं प्र
माणं। शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञाने अधर्मं। यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाभ्यु
दयाय। तद्यथा। हिक्कितहसितकंडूयितानि नैव तद्दोषाय भवन्ति नाभ्युदयाय। अथवाऽभ्युपाय एवापशब्दज्ञा
नं शब्दज्ञाने। योऽपशब्दान्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भव
ति। अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति। अथवा कूपखानकवदेत[illegible]द्भविष्यति। तद्यथा कू
पखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु संजातासु तत एव तं गु
णमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यप
शब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदये
न योगो भविष्यति। यदप्युच्यते। आचारे नियम इति। याज्ञे कर्मणि स नियमः अन्यत्रानियमः॥

16

शिवः

ब्दज्ञानस्य नास्तीत्यर्थः। दोष इति। उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवतीत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्यक्षधर्माण इति। योगिप्रत्यक्षेण सर्वं विदितवंत इत्यर्थः। परावरज्ञा इति। विद्याविद्याप्रविभागज्ञाः। अथेति। उक्तमिदं नचांतरे
ण व्याकरणमित्यादि। तत्र पक्षद्वये विशेषदर्शनात्प्रश्नः। षष्ठ्यर्थ इति। द्वाभ्यामपि शब्दाभ्यामस्वार्थाभ्यां प्रतिपादनाद्व्यतिरेकाभावः।

एवंहि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञाः विदितवेदितव्याः
अधिगतयाथातथ्याः। ते तत्र भवंतः यद्वा नस्तद्वा न इति वक्तव्ये यर्वाणस्तर्वाण इति प्रयुंजते या
ज्ञे कर्मणि पुनर्नापभाषंते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं। ततस्ते पराभूताः। अथ व्याकर
णमित्यस्य शब्दस्य कः पदार्थः। [illegible] सूत्रं। सूत्रे व्याकरणे षष्ठ्यर्थोऽनु[illegible]पपन्नः। सूत्रे व्याकर
णे षष्ठ्यर्थो नोपपद्यते व्याकरणस्य सूत्रमिति। किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः सूत्रं स्या
त्। शब्दाप्रतिपत्तिः। शब्दानां चाप्रतिपत्तिः प्राप्नोति। व्याकरणाच्छब्दान्प्रतिपद्यामह इति। नहि सू
त्रत एव शब्दान्प्रतिपद्यंते। किं तर्हि व्याख्यानतश्च। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भ
वति। न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐज् इति। किं तर्हि उदाहरणं प्रत्युदाहरणं
वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति। एवं तर्हि शब्दः। शब्दे ल्युडर्थः। यदि शब्दो व्याकर
णं ल्युडर्थो नोपपद्यते। व्याक्रियंते शब्दा अनेनेति व्याकरणं न

सामान्यविशेषशब्दतया तूभयोः सहप्रयोगो न विरुध्यते
यदा त्ववयवाध्यायैकदेशः सूत्रशब्देनाच्यते तदा षष्ठ्यर्थोऽप्युपपद्यते। शब्दाप्रतिपत्तिरिति। तद्व्याख्यानरहितसूत्रमात्रश्रवणाच्छब्दाः प्र
तीयंते। समुदितमिति। समुदायादेवार्थावसायो भवतीत्यर्थः। शब्द इति। करणे ल्युड्विधीयते। शब्दश्च व्याक्रियमाणत्वात्कर्म न तु क

© Dharmartha Trust J&K. Digitized by eGangotri

भवत्वेति। शब्दैर्व्याख्यायमानत्वेन भवो योग इति चेन्मीमांसादिष्वेतस्यापि शब्दं प्रति विचारकत्वाद्वैयाकरणत्वप्रसंगः। न चेदानीमि
ति। लक्षणप्रपंचाभ्यां कृत्स्नस्त्रवद्वार्त्तिकानामुपप... स्यादोषपरिहारः। प्रस्कंदनमिति। यद्यप्ययं भीमादिसूत्रेष्वपि कृत्यल्युटो बहुल

भवे। भवे च तद्धितो नोपपद्यते। व्याकरणे भवो योगो वैयाकरण इति। न हि शब्दे भवो योगः। क्व तर्हि।
सूत्रे। प्रोक्तादयश्च तद्धिताः। प्रोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयं आ
पिशलं काशकृत्स्नमिति। न हि पाणिनिना शब्दाः प्रोक्ताः। किं तर्हि। सूत्रं। किमर्थमिदमुभयमुच्य
ते। भवे प्रोक्तादयश्च तद्धिता इति। न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात्।
पुरस्तादिदमाचार्येण दृष्टं भवे इति। तत्पठितं। तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता
इति। तदपि पठितं। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्त्तयंति। अयं तावददोषः। यदुच्यते श
ब्दे ल्युडर्थ इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते। किं तर्हि अन्येष्वपि कारकेषु कृत्य
ल्युटो बहुलमिति। तद्यथा। प्रस्कन्दनं प्रपतनमिति। अथवा शब्दैरपि शब्दा व्याक्रियंते। तद्य
था। गौरित्युक्ते सर्वे संदेहा निवर्त्तंते नाश्वो न गर्दभ इति। अयं तर्हि दोषः। भवे प्रोक्तादयश्च त
द्धिता इति। एवं तर्हि लक्ष्यलक्षणे व्याकरणं। लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। किं पु

मित्यस्यैव भीमादयोपादानइत्ययं प्रपंचः इति भावः। गौरित्युक्ते इति। सास्नादिमत्तियदा किंचित्स्वरूपं गौरित्युच्यते तदा तत्रवाचकांत
राणां निवृत्तिः कृता भवति। एवमेकस्मिन्नुदाहरणे सर्वाणि तत्सदृशानि शब्दान्तराणि प्रतीयंते॥ ॥श्रीः॥रामजी॥श्रीकृष्णजी॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वे पंचाला इति। जनपदांतरनिवृत्तिविवक्षायां एकदेशेपि समुदायरूपारोपात्प्रयोगः। तैलमिति। यद्दोषधसंयुक्तात् घृततैलमात्राभ
वति तदेवमुदाहरणं। आकृतिवाचित्वे तु घृततैलशब्दयोः संस्थानप्रमाणनिरपेक्षाः सर्वत्र मुख्या वृत्तिः। शुक्ल इति। अशुक्लेप्यवयवेऽव

एवमप्ययं दोषः। समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्यते वै
याकरण इति। नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते। तद्यथा। पूर्वे पंचालाः
उत्तरे पंचालाः। तैलं भुक्तं। घृतं भुक्तं। शुक्लो नीलः कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृ
त्तोऽवयवेपि प्रवर्त्तते। अथवा पुनरस्तु सूत्रं। ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपप
न्न इति। नैष दोषः। व्यपदेशिवद्भावेन भविष्यति। यदप्युच्यते शब्दाप्रतिपत्तिरिति। न हि
सूत्रत एव शब्दान्प्रतिपद्यन्ते किं तर्हि व्याख्यानतश्चेति। परिहृतमेतत्। तदेव सूत्रं विगृहीतं
व्याख्यानं भवतीति। ननु चोक्तं न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति। किं त
र्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवतीति। अविजानत
एतदेवं भवति। सूत्रत एव शब्दान्प्रतिपद्यन्ते। आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत॥

यवांतरस्य शौक्ल्यात् समुदायस्य शुक्लत्वसत्यारोपात्प्रयोगः। व्यपदेशिवद्भावेनेति। यथा राहोः शिर इत्येकस्मिन्नपि वस्तुनि बुद्ध्यार्पितभेदाद्भे
दव्यवहारः। एवमिहापि व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते। सूत्रशब्देन तु समुदायरूपतेति भेद
व्यवहार उपपद्यते। सूत्रत एवेति पदच्छेदादिभिः सूत्रार्थस्यैवाभिव्यंजनात्। आत इति निपातः। आतश्च हेतोरित्यर्थः। नाद इति। नेत
दित्यर्थः। अथवा नादो ग्रहीतव्या हेय एवेत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

किमर्थ इति। नहि वर्णोपदेशेन कस्यचित्साधु[शब्द]स्यानुशासनमिति भावः। वृत्तिसमवायार्थ इति। लाघवेन शास्त्रप्रवृत्त्यर्थ इत्य
र्थः। धर्मनियमवत्समासः। वृत्त्यर्थ इति। शास्त्रप्रवृत्तिप्रत्यासन्नत्वं समवायस्य दर्शयति। इग्यणः इत्यादौ हि यया संख्यशास्त्रं
वर्णसन्निवेशमात्रादेवावतिष्ठते। वृत्तिप्रयोजन। पारंपर्येण शास्त्रप्रवृत्तावस्यांगत्वं। सति हि समवाये प्रत्संज्ञा तत्र[illegible]दिस्ये

अथ किमर्थो वर्णानामुपदेशः। वृत्तिसमवायार्थ उपदेशः। वृत्तिसमवायार्थो वर्णानामु[पदे]शः क
र्त्तव्यः। किमिदं वृत्तिसमवायार्थ इति। वृत्तये समवायो वृत्तिसमवायः। वृत्त्यर्थो वा समवायो वृत्तिस[म]
वायः। वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः। का पुनर्वृत्तिः। शास्त्रप्रवृत्तिः। अथ कः समवा
यः। वर्णानामानुपूर्व्येण सन्निवेशः। अथ क उपदेशः। उच्चारणं। कुत एतत्। उच्चार्य हि वर्णानाहुरु
पदिष्टा इमे वर्णा इति। अनुबंधकरणार्थश्च। अनुबंधकरणार्थश्च वर्णानामुपदेशः कर्त्तव्यः। अ
नुबंधानासंक्ष्यामीति। नह्यनुपदिश्य वर्णाननुबंधाः शक्या आसंक्तुं। × दिशिरुच्चारणक्रियः। × स एष
वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबंधकरणार्थश्च। वृत्तिसमवायश्चानुबंधकरणं च प्र
त्याहारार्थं। प्रत्याहारो वृत्त्यर्थः। इष्टबुद्ध्यर्थश्च। इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः। इष्टान्वर्णान्भोत्स्य
इति। नह्यनुपदिश्य वर्णानिष्टाः शक्या विज्ञातुं। इष्टबुद्ध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदी
र्घप्लुतानामप्युपदेशः। इष्टबुद्ध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्त्त

नेति। ततो कृलोपदृत्यादिशास्त्रप्रवृत्तिः। प्रत्याहारार्थमिति। प्रत्याहारशब्देनाणादिकाः संज्ञा उच्यंते। इष्टबुद्ध्यर्थश्चेति। सति हि उपदेशे क
लादिदोषरहिता ये वर्णा निर्दिष्टास्ते तथैव प्रयोक्तव्या इत्युक्तं भवति। एकश्रुत्यादि हि स्वराणां पाठात्सर्वेषामुदात्तादीनामुपदेशः कर्त्तव्य इत्याह।

शिवः
१८

वर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

आकृत्युपदेशादिति। उपात्तोपि विशेषो नांतरीयकत्वाज्जातिप्राधान्यविवक्षायामविवक्षित इत्यर्थः। संवृतादीनामिति। एकारादी
नां संवृतत्वं दोषो न त्वकारस्य। तस्य संवृतगुणत्वात्। तत्र संध्यक्षरेषु विवृततमेषूच्चार्येषु संवृतत्वं दोषः। कलः स्थानांतरनि
ष्पन्नः काकलीत्वेन प्रसिद्धः। ध्मातः श्वासभूयिष्ठतया ह्रस्वोपि दीर्घ इव लक्ष्यते। एणीकृतो विशिष्टः किमयमोकार औकारो
वेति यत्र संदेहः। अंबूकृतो यो व्यक्तोप्यंतर्मुख इव श्रूयते। अर्द्धको दीर्घोपि ह्रस्व इव श्रूयते। ग्रस्तो जिह्वामूले निगृहीतः। अव्य

आकृत्युपदेशात्सिद्धं। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिस्त
थोवर्णाकृतिः। आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः। आकृत्युपदेशात्सिद्ध
मिति चेत्संवृतादीनां प्रतिषेधो वक्तव्यः। के पुनः संवृतादयः। संवृतः कलो ध्मातः एणीकृतो
ऽंबूकृतोऽर्द्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति। अपर आह। ग्रस्तं निरस्त
मविलंबितं निर्हतमंबूकृतं ध्मातमथो विकंपितं। संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमे
ताः स्वरदोषभावनाः इति। अतोन्ये व्यंजनदोषाः। नैष दोषः। गर्गादिबिदादिपाठात्संवृ
तादीनां निवृत्तिर्भविष्यति। अस्त्यन्यद्गर्गादिबिदादिपाठे प्रयोजनं। किं। समुदायानां सा

क्त इत्यपरे। निरस्तो निष्ठुरः। प्रगीतः सामवदुच्चारितः। उपगीतः समीपवर्णांतरगीत्यानुरक्तः। क्ष्विण्णः कंपमान इव। रोम
शो गंभीरः। अविलंबितो वर्णांतरसंभिन्नः। निर्हतो रूक्षः। संदष्टो वर्द्धित इव। विकीर्णो वर्णांतरे प्रसृतः। एकोप्यनेकनि
र्भासीत्यपरे। स्वरदोषभावना इति। स्वरदोषगोचरा इति। अनंता हि दोषा अशक्ताः प्रमादकृताः। अस्त्यन्यदिति। गर्ग इत्यादि
सन्निवेशादिना गर्गादीनां साधुत्वं यथा स्यात्। गार्ग्य इत्यादीनां मा भूत्। ततश्च गर्गादिस्थानापन्नेवाकारादीनां दोषवतां निवृत्तिः स्या
त्स्यात्। न तु समुदायांतरस्थानां। यद्यपि प्रत्ययविधानार्थो गर्गादीनां पाठस्तथापि प्रसंगात्समुदायसाधुत्वार्थोपि भवति॥

© Dharmartha Trust J&K. Digitized by eGangotri

कलादिकप्रक्रियाय

निवृत्तकलादिकामिति। अकारस्य संवृतत्वात् निवृत्तसंवृतत्वादिकामिति नोक्तं। अकारस्य निर्देशार्थत्वात्सवर्णानांग्रहणात्त्वां
तत्प्रत्यापत्तिः रित्यर्थः। यदनुबंधैरिति। यथा स्वरितत्वमधिकारार्थमेवमात्मनेपदार्थ[illegible]र्थं कलादात्मनेपदमित्यादिक·
रिष्यते। न त्वनुदात्तङित इत्यादि। नन्वेवमनुबंधाभावे कथमणादिकाः संज्ञा उत्पद्यंते। आदिरंत्येन सहेत्युक्ता अइउ इत्यादि

19

एवं तर्ह्यष्टादशधाभिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि। सा तर्हि वक्त
व्या। लिंगार्था तु प्रत्यापत्तिः। लिंगार्था सा तर्हि भवति। तत्तर्हि वक्तव्यं। यद्यप्येतदुच्यते। अथ
वैतर्हि। अनेकमनुबंधशतं नोच्चार्यं। इत्संज्ञा च न वक्तव्या। लोपश्च न वक्तव्यः। यदनुबं
धैः क्रियते तत् कलादिभिः करिष्यते। सिध्यत्येवं। अपाणिनीयं तु भवति। यथान्यासमे
वास्तु। ननु चोक्तं आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध इति। परिहृत
मेतत्। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति। ननु चान्यद्गर्गादिबिदा
दिपाठे प्रयोजनमुक्तं। किं। समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्युभयमनेन
क्रियते पाठश्चैव विशेष्यते कलादयश्च निवर्त्यंते। कथं पुनरेकेन यत्नेनोभयं लभ्यं।
लभ्यमित्याह॥

काः संज्ञाः करिष्यंते। स्वरसंज्ञिश्चासंदेहायन करिष्यते इत्यदोषः। उभयमिति। यथाभूता गर्गा
दिस्था अकारादयस्तथाभूता एव सर्वत्र प्रयोक्तव्या इति प्रतिपाद्यत इत्यर्थः॥ ॥श्रीः॥राम॥श्रीकृष्णजी॥वासुदेव॥राम॥

शिवः

© Dharmartha Trust J&K. Digitized by eGangotri

पुस्तकमेतत्हृदयश्रीकरपाठकीयम्
प्रथमाह्निकस्यपत्राणि २०

१॥

(२०)

© Dharmartha Trust J&K. Digitized by eGangotri

द्विगता इति॥ द्वावप्यौगताः प्रयोजनद्वयसंपादका इत्यर्थः। तथा वाक्यान्यपीति। शब्दस्याप्यर्थवद्द्विगतत्वमित्यर्थः॥ अथवे
ति। केवलानां वर्णानां लोके प्रयोगाभावाद्धात्वादीनां च शुद्धानां पाठात्तत्सत्वाच्च वर्णानां न कश्चिद्दोषः। यानि तर्हीति।

द्विगता अपि हेतवो भवंति। तद्यथा। आम्राश्च सिक्ताः पितरश्च प्रीणिता इति। तथा वा
क्यान्यपि द्विष्ठानि भवंति। श्वेतो धावति। अलंबुसानां यातेति॥ अथवा इदं तावदयं
प्रष्टव्यः। क्वेमे संवृतादयः श्रूयेरन्निति। आगमेषु। आगमाः शुद्धाः पठ्यंते। विकारे
षु तर्हि। विकाराः शुद्धाः पठ्यंते। प्रत्ययेषु तर्हि प्रत्ययाः शुद्धाः पठ्यंते। धातुषु तर्हि धा
तवोपि शुद्धाः पठ्यंते। प्रातिपदिकेषु तर्हि प्रातिपदिकान्यपि शुद्धानि पठ्यंते। यानि
तर्ह्यग्रहणानि प्रातिपदिकानि। एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्त
व्यः। शशः षष इति माभूत् पलाशः पलाष इति माभूत्। मंचको मंजक इति माभूत्
आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः। उच्चार्यंते ततस्तेषु नेमे प्राप्ताः कलो
दयः॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य

शिवः

२०

द्वित्वादीनि। एतेनाप्यपीति। शिष्टप्रयुक्तेनाणादीनां पृषोदरादीनां च साधुत्वाभ्यनुज्ञानात् सर्वेषामत्र संग्रहः॥ ॥इत्युपाध्याय
जैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकं॥ ॥शुभं भवतु॥ श्रीः राम॥ कृष्ण जी॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाष्यकेय्य रद्धितीयाह्निक॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ अइउण्॥ ॥सर्ववर्णानविशेषेणाविचार्यविशेषेणात्रविचारः क्रियते। अकारस्येति। अत्राकारादीनां स्वरूपेणानुकार्येणवासतोप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुपत्तिः। स्वरसंधिस्तुनप्रवर्त्तते। वर्णोपदेशोऽज्ञादिसंज्ञानामनिष्पादतः। तत्राकारस्य संवृतत्वाद्दीर्घप्लुतयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञायाअप्रसंगात्सूत्रेषुअकारेणदीर्घप्लुतयोर्ग्रहणंनप्राप्नोतिइति। विवृतत्वम स्योपदिश्यते। विवृतत्वस्यगुणस्योपदेशोविवृतोपदेशः। तत्रगुणेनित्यसापेक्षत्वादकारापेक्षितत्वेपिसमासः। यथादेवदत्तस्य गुरुकुलमिति। आकारग्रहणार्थइति। विवृतोपदेशआकारग्रहणार्थइतिसामानाधिकरण्येननिर्देशःअकारग्रहणंविवृतोपदे

श्रीः॥ अइउण्॥ ॥अकारस्यविवृतोपदेशआकारग्रहणार्थः॥ अकारस्यविवृतोपदेशः कर्त्तव्यः। किंप्रयोजनं आकारग्रहणार्थः। अकारः सवर्णग्रहणेनआकारमपिगृह्णीया त्। किंचकारणंन [illegible] गृह्णीयात्। विवारभेदात्। किमुच्यतेविवारभेदादितिनपुनःका लभेदादिति। यथैवह्यर्थंविवारभिन्नः एवंकालभिन्नोपि॥ पृष्ठा

२१

शस्यप्रयोजनमितिसामर्थ्याद्वगम्यमानोप्यानुरूप्यमुत्तरंनभवतीतिमन्वानोदनीयं। सवर्णग्रहणेनेति। येनशास्त्रेणअणुदित्सवर्णस्यचेत्यनेनसवर्णोगृह्यंतेतेनकारणेनेत्यर्थः। किंचकारणमिति। आकेतिपदाश्रयेणग्रहणकशास्त्रस्यप्रसारव्याना दकारस्याप्यजातिसञ्ज्ञावाक्षिद्धग्रहणमितिभावः। अत्रचनिमित्तकारणहेतुषुसर्वासांप्रायदर्शनमितिप्रथमाकृता। तेनकस्मात्कारणादित्यर्थः संपद्यते। विवारभेदादित्यत्रतुकारणशब्दप्रयोगाभावात्प्रायग्रहणादसर्वनाम्नोवा प्रथमाद्वितीययोरभावाद्विभाषागुणेस्त्रियामितिपंचमीविहिता। विवारयतिविकासयतिआस्यमितिविवारःप्रयत्नः। अक्रियपक्षेग्रहणकशास्त्रारंभाद्दोषापत्तिः। अक्रियपक्षेभेदांतरसद्भावादाह। किमुच्यतइति। शिव॰

१

© Dharmartha Trust J&K. Digitized by eGangotri

बाह्यश्चेति। प्रयत्नाभिनिर्वृत्तत्वात्कालस्य प्रयत्नत्वमभ्युपगम्य बाह्यत्वेन परिहारः। प्रसिद्धपरिमाणावस्थान्तरगतपरिच्छेदकः क्रियान्तरा
पेक्षणं कालव्यवहारस्य बाह्यत्वं कालस्यापर्यायाद्व्रीहेः प्रस्थादिव्यवहारः परिमाणाद्द्रव्यकृतः। एवं मात्रादिव्यपदेशो निमेषादि कृप
कृतः। अप्रधानाभिप्रदेशे एवं विशिष्टप्रयत्नारंभाद्दीर्घादिनिष्पत्तौ नावश्चास्याह्यत्वात्कालस्य बाह्यत्वं। विवृतत्वादीनां
वास्यवर्तिप्रयत्ननिष्पाद्यत्वादभ्यंतरत्वं। द्रुतादिवृत्तयस्तु यथा न भेदिकास्तथा तत्परस्तत्रैव स्थानि। किंपुनरिति। किं स्त्वका

सस्यमेवमेतत्। वक्ष्यति तुल्यास्यप्रयत्नं सवर्णमिति तत्रास्य ग्रहणस्य प्रयोजनं। आस्ये
येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञका भवंति। बाह्यश्च पुनरास्यात्कालः। तेन स्यादे
व कालभिन्नस्य ग्रहणं न पुनर्विवारभिन्नस्य। किंपुनरिदं विवृतस्योप दिश्यमा
नस्य प्रयोजनमन्वाख्यायते आहोस्वित्संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चो
द्यते। विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथं ज्ञायते। यदयं अ अ इ
त्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति। नैतदस्ति ज्ञापकं॥

रेणैव विवृतोपदेशः कृतो वार्त्तिककारेण तु तस्य प्रयोजनमुक्तं। अथवा कृत एव विवृतोपदेशो वार्त्तिककृता चोद्यते नोपदेश्य
स्त्विति प्रश्नः। दुरवधारत्वादुपदिष्टोपि विवृतो व्याख्यानेन विना न प्रकाशते ज्ञातुमिति प्रत्यस्तेप्यकारे प्रश्नोयं नासमंजसः। त
त्र प्रत्यापत्त्या पूर्वः पक्ष आश्रितः। अन्यथा शास्त्रांते प्रत्यापत्तिवचनमनर्थकं स्यात्। स्वरूपप्रत्यवाभावात्॥ ० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अस्तिह्यन्यदिति। प्रयोगएवप्राप्तेविवृतत्वेसं[illegible]वृत[illegible]प्रत्यापत्तिःस्यादितिज्ञापकमेतदित्यर्थः। नन्विदानींविवृतोपदेशोसा
वर्ण्याभावादकारेणाकारस्याग्रहणादन्तराभावात्कथमतिखट्वइतिह्रस्वः। नैषदोषः। उदीचामातःस्थानइतिज्ञापकाद्भवत्याका

अस्तिह्यन्यदेतस्यवचनेप्रयोजनं। किं। अतिखट्वः अतिमालइत्यत्रांतर्यतोविवृतस्य
विवृतःप्राप्नोति। संवृतःस्यादित्येवमर्थाप्रत्यापत्तिः। नैतदस्ति। नैवलोकेनैववेदेअकारो
विवृतोस्तिकस्तर्हि संवृतःयोस्तिसभविष्यति। तदेतत्प्रत्यापत्तिवचनंज्ञापकमेवभ
विष्यति। विवृतस्योपदिश्यमानस्यप्रयोजनमन्वाख्यायतेइति। कःपुनरत्रवि
शेषः विवृतस्योपदिश्यमानस्यप्रयोजनमन्वाख्यायतेसंवृतस्योपदिश्यमानस्यावि
वृतोपदेशश्चोद्यतइति। नखलुकश्चिद्विशेषः। आहोपुरुषिकामात्रंतुभवानाहसं
वृतस्योपदिश्यमानस्यविवृतोपदेशश्चोद्यतेइति। वयंतुब्रूमोविवृतस्योपदि
श्यमानस्यप्रयोजनमन्वाख्यायतेइति॥

रस्यह्रस्वः। नैवलोकइति। प्रयुक्तानामनुशासनात्प्रयोगेचविवृतस्याकारस्यासंभवात्संवृतएवभविष्यतीतिप्रत्यापत्ति
ह्रीपिकेव। कःपुनरिति। विवृतोपदेशाद्दसंवृतत्वइतिवाकर्त्तव्यइतिवावाक्याध्याहारेनकश्चिद्विशेषइत्यर्थः। आहोपुरुषि
केति। अहो अहंपुरुषइत्यहंकारवानहोपुरुषस्तस्य [illegible] भावइतिमनोज्ञादित्वाद्वुञ्। अहंकारवत्त्वमित्यर्थः॥

शिवः

© Dharmartha Trust J&K. Digitized by eGangotri

नस्यति। यदा प्रत्याहारे विवृतोकार उपदिश्यते तदा प्रयत्नभेदात्तेन संवृतस्याकारस्य ग्रहणाभावादन्कार्यं न स्यादिति तत्सिद्धये सर्वस्याकार
स्य विवृतत्वं प्रतिज्ञेयं कर्तव्यमित्यर्थः। तेन दण्डाग्रमित्यादौ दीर्घादि सिध्यति। ननु च सर्वेषामकाराणां यत्सामान्यं तदनुकरणमत्राकारः।
तस्य च विवृतत्वे प्रतिज्ञायमाने सर्वेषां तत्प्रतिज्ञातं भवतीति किमुच्यते तस्य विवृतोपदेशादिति। एवं तर्हि यदा कस्यचिदेवाकारस्येह

तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः। तस्यैतस्याक्षरसमाम्नायि
कस्य विवृतोपदेशादन्यत्र विवृतोपदेशः कर्तव्यः। क्वान्यत्र। धातुप्रातिपदिकप्रत्ययनिपात
स्थस्य। किं प्रयोजनं। सवर्णग्रहणार्थः। आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात्। किं
च कारणं न स्यात्। विवारभेदादेतत्। आचार्यप्रवृत्तिर्ज्ञापयति भवत्याक्षरसमाम्नायि
केन धात्वादिस्थस्य ग्रहणमिति। यदयमकः सवर्णे दीर्घ इति प्रत्याहारे ऽकोग्रहणं करोति
कथं कृत्वा ज्ञापकं। न हि द्वयोराक्षरसमाम्नायिकयोर्युगपत्संभवस्यानमस्ति। नैतदस्ति ज्ञा
पकं। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति तद
र्थमेतत्स्यात्। खट्वाढकं मालाढकमिति। सति प्रयोजने ज्ञापकं न भवति। तस्माद्विवृतोपदेशः

मनुकरणं स्वरूपपदार्थको वा अकारः तदेदमुच्यत इत्यदोषः। यदयमिति। अत्रेकारेण चिह्नेन प्रत्याहारस्याविवृतो निर्दि
ष्टः। तेन संवृतस्याग्रहणे ऽकः सवर्णे इति वक्तव्यं। न हि द्वयोरिति। यद्यप्येको विवृतो नास्ति तथापि व्यवधानत्वादेकादेशस्य द्व
योरित्युक्तं। नैतदिति। अक इत्यकारेण विवृतेन दीर्घस्य विवृतस्य ग्रहणाद्ज्ञापकमेतदित्यर्थः।।

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰ २३

क एष यत्न इति। धात्वादयः पठिताः। तत्राकारो विवृतः पठ्यतां न हि गौरवं भवति तत्किमुच्यते। अत्रापि विवृतोपदेशः कर्त्तव्य इति
प्रश्नः। यानीति। प्रतिपदपाठस्याशक्यत्वात्तस्य विवृतोपदेश इत्यनेन सर्वस्याकारस्य विवृतोपदेशः कार्यस्तथा चोद्यत इत्यर्थः।
धात्वादिस्था इति। अग्रहणप्रातिपदिकार्थं विवृतत्वेऽवश्यं चोदनीये धात्वादिस्थस्यापि संवृतस्यैव पठितस्य कार्यार्थं विवृ

क एष यत्नश्चोद्यते विवृतोपदेशो नाम। विवृतो वोपदिश्येत संवृतो वा कोन्वत्र विशेषः। स
एष सर्व एवमर्थो यत्नः क्रियते यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपाये
नोपदेशश्चोद्यते तद्गुरु भवति। तस्माद्धकं संघात्वादिस्थाश्च विवृता इति। दीर्घप्लुतव
चनेन च संवृतनिवृत्त्यर्थः। दीर्घप्लुतवचनेन च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्त्तव्यः।
दीर्घप्लुतौ संवृतौ मा भूतामिति। वृक्षाभ्यां देवदत्ता३ इति। नैव लोके नैव वेदे दीर्घप्लुतौ
संवृतौ स्तः। कौ तर्हि विवृतौ। यौ स्तः तौ भविष्यतः। स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणं।
संवृतः स्थानी। संवृतौ दीर्घप्लुतौ प्रकल्पयेत्। अनुस्वारो यथा यणं। तद्यथा। सय्यँता सव्व
त्सरः यल्लोकं तल्लोकमिति। अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति।

१३ शिवः

तत्त्वं प्रतिज्ञेयं। अन्यथा शेषरूपविवृतोच्चारणे [illegible] प्रयत्नस्य गौरवं स्यात्। विवृतत्वज्ञाने प्रयोजनान्तरमाह दीर्घेति। असति
विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य स्थाने सावर्ण्यात् संवृतयोरेव दीर्घप्लुतयोः प्रसंग इत्यर्थः। नैव लोक इति। असत्य
पि सावर्ण्ये लिंगादकारस्य संवृतस्य विवृतौ दीर्घप्लुतौ न भविष्यतः। यद्ययमतो दीर्घो यञि सुपि(?) अतो रोरप्लुतादप्लुत इत्या

© Dharmartha Trust J&K. Digitized by eGangotri

सतस्तत्रेति। अथ कथत्वाद्दीर्घप्लुतयोः संवृतयोरुच्चारणस्येत्यर्थः। एवमपीति। असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य संवृतावेव ई
कारोकारौ प्राप्नुतः। एतेन संवृतावन्यत्रार्थे च स्याताम् इति वैकल्पिकी ईकारोकार[illegible]योः संवृतत्वस्याभ्युपगमात्। तत्रानुवृत्तिनिर्देश इ
ति। अकः सवर्णे दीर्घ इत्यादौ नयनेवाकारेणानुकृत इति ककारादिनाधिकेन ज्ञायते। ततश्चाणत्वात्तस्य ग्रहणकत्वमस्त्वस्य च्चाद्वि

विषम उपन्यासः। युक्तं यत्तस्य तत्र प्राप्तिर्भवति। संतिहि यणः सानुनासिका निरनुनासि
काश्च। दीर्घप्लुतौ नैव लोके नैव च वेदे संवृतौ स्तः। कौ तर्हि। विवृतौ। यौ स्तः स्तौ भविष्यतः। एव
मपि कुत एतत् तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः। न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्यातां।
ईकार ऊकारौ वेति। वक्ष्यति स्थानेऽन्तरतम इत्यनुवर्तमाने पुनः स्थानेग्रहणस्य प्रयोजनं
यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवतीति। तत्रानुवृत्तिनिर्देशे सवर्णो
ग्रहणमनणत्वात्। तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति। अस्य चोपस्येति च। किं
कारणं। अनणत्वात्। न ह्येतेऽणः ये अनुवृत्तौ। के तर्हि। येऽक्षरसमाम्नाय उपदिश्यन्ते। एकत्वादका
रस्य सिद्धं। एकोऽयमकारो यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः। अनुबंध
संकरस्तु। अनुबंधसंकरस्तु प्राप्नोति कर्मण्यण् आतोऽनुप
सर्गे त्वकारस्यानणत्वाद्ग्रहणकत्वं न प्राप्नोतीत्यर्थः। इति शा
स्त्रस्य लक्ष्यप्रवृत्तिः। तदनुगतो निर्देशोऽनुवृत्तिनिर्देशः। एकत्वादकारस्येति। एक एवाकारव्यक्तिः उदात्तादिभेदप्रतिभासस्तु व्यंजकध्व
निकृतः। खड्गतैलादर्शादिभेदे प्रतिबिंबप्रतिबिंबवत्। अकारस्य निदर्शनार्थत्वादिकारादीनामप्येकत्वं बोद्धव्यं। अनुबंधसंकर
इति। एकत्वे काण्टकादीनां भेदाभावाज्ञोदादोडौ बादिः प्राप्नोति॥ श्रीः राम॥

मात्रभेद

© Dharmartha Trust J&K. Digitized by eGangotri

किरिणेति। नगोम्वन्नावर्णे इति प्रतिषेधादकारो नोदात्तः। घटेनेति। एक एवाकारोऽदिरुच्चार्यत इति अत्वाभावः। ठंस्तु बाह्वका
दिषु रूत इत्यर्थः। द्रव्यवदिति। उपचारो व्यवहारः। यथैकेन घटेनोदकाहरणादिक्रियां युगपदनेको न करोति तथैवैकमकारं यु
गपदनेको नोच्चारयेदित्यर्थः। विषयेणेति। वार्तिककारेणाकरणत्वेन सामान्यरूपतया चाभेदेन विषयो निर्दिष्टः। भा

एकाजनेकाज्ग्रहणेषु चानुपपत्तिः। एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति। तत्र को दोषः।
किरिणा गिरिणा। त्यकाज्ग्रहणसंतोदात्तत्वं प्राप्नोति। इह च घटेन तरति घटिक इति घञ्लो
पणं ष्ठन् प्राप्नोति। द्रव्यवच्चोपचाराः। द्रव्यवच्चोपचाराः प्राप्नुवंति। तद्यथा द्रव्येषु नैकेन घ
टेनानेको युगपत्कार्यं करोति। एवमिममकारं नानेको युगपदुच्चारयेत्। विषयेण तु ना
नालिंगकरणात्सिद्धं। यदयं विषये विषये नानालिंगमकारं करोति। कर्मण्यण्। आतो
नुपसर्गे कः इति। तेन ज्ञायते नानुबंधसंकरोऽस्तीति। यदि हि स्यात्, नानालिंगकरणमन
र्थकं स्यात्। एकमेवायं सर्वगुणमुच्चारयेत्। नैतदस्ति ज्ञापकं। इत्संज्ञाप्रक्लृप्त्यर्थमेतत्
स्यात्। नसयमनुबंधैः शल्यकवत्स्यात् उपचेतुं। इत्संज्ञायां हि दोषः स्यात्। आयम्यादि सूत्रा

ष्यकारस्त्वधिकरणार्थत्वं व्यक्तिनेतादृशीं साच प्रतिपादयति विषये विषये इति। सर्वगुणमिति। गुणा अनुबंधाः कार्याया श्रितत्वा
दुपकारकत्वात्। तत्र कर्मण्यणि कन्निति क्रियादित्यर्थः। शल्यकवदिति। शल्यकः प्राणिविशेषः। स यथा कंटकतुल्यैः पक्षैर्यां
प्यते नैवं सर्वानुबंधयुक्तोऽकारः शक्यो निर्देष्टुं। आद्यंतयोरेवेत्संज्ञाविधानान्मध्यपतितानां श्रवणप्रसंगादित्संज्ञैवायच्छतेवा

© Dharmartha Trust J&K. Digitized by eGangotri

एवं तर्हीति। विषयेणेत्यन्यथा व्याचष्टे। नानाशब्दमपनीय पुनः शब्दं पठित्वा यद्यनुबंधसंकरः स्यादकारमेव शिवादिभ्यो विदध्यात्। अथो
च्यते णित्कृतमेव यथा स्यात् न तु कृत्तमाभूदिति नियमार्थमेतत्स्यात्। तन्न। नियमाद्धि ह्येवर्वलीयस्त्वात्। अथ वे लि। न हेतः सर्वगुणपु
न्नारये दिति किं तर्हि यथा लोके इह मुंडो भव इह जटिलो भवेति नष्टो भवेति यथाक्रमं गुणको यत्रोच्यते तद्गुणक एव तत्र भवति। ए

५वै

एवं तर्हि विषयेण तु पुनर्लिंगकरणं सिद्धं। यद्दयं विषये विषये पुनर्लिंगमकारं करोति
प्राग्दीव्यतोऽण् शिवादिभ्योऽणिति। तेन ज्ञायते नानुबंधसंकरोऽस्तीति यदि हि स्यात् पुनर्लिं
गकरणमनर्थकं स्यात्। अथवा पुनरस्तु विषयेण तु पुनर्लिङ्गकरणं सिद्धं नित्ये वान
नुबंधकं इत्संज्ञाप्रकृत्यर्थमेतत्स्यात् इति। नैष दोषः। लोकत एतत्सिद्धं तद्यथा। लोके क
श्चिद्देवदत्तमाह इह मुंडो भव इह जटिलो भव इह शिखी भवेति। यल्लिंगो यत्रोपदिश्य
ते तल्लिंगस्तत्रोपतिष्ठते। एवमयमकारो यल्लिंगो यत्रोच्यते तल्लिंगस्तत्रोप
स्थास्यते। यदप्युच्यते एकाजनेकाज्ग्रहणेषु चानुपपत्तिरिति। एकाजनेकाज्ग्रह
णे घाटिन्ति संख्यानात्। एकाजनेकाज्ग्रहणे घाटिकेः संख्यानादनेकाच्त्वं भविष्यति।

नाना

वमिहापि याभ्यः प्रकृतिभ्यो यदनुबंधविशिष्टो विधीयते तास्वेव तदनुबंधनिमित्तमेव कार्यं संपादयति। घाटिन्ति संख्यानात्
ति। यथा विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरभ्यासात् सप्तदश संपद्यंते। तथा घटेतेतरत्नीति घाज्जलक्षणः
प्रवर्तति। ननु कृत्स्ने विषये कृतार्थता च्वचनस्य गोणांच संकर्षकार्यं निमित्तं उच्यते। गोणवचनइत्यत्रार्चवश्चाद्वानतिषेधात् लिंगादशेषतस्त
देनापि भेदाश्रयकार्यप्रवृत्तिः॥ ॥श्री४॥ राम॥

© Dharmartha Trust J&K. Digitized by eGangotri

भवेदिति। गिरिणोसादावावृत्तिभेदेपि मुख्यमेकात्वं न निवर्त्तते इति भावः। एतदपीति। लोके सर्वा संख्यासंख्यांतरेण मुख्येन गौणेन च बाध्यते इत्यर्थः। ऋषिसहस्रमिति। विंशेः की वा प्रत्येकं सहस्रासहस्रदक्षिणा ऋषयः संपन्ना इत्यर्थः। ऋषयः सह्स्र तः

तद्यथा। सप्तदशसामिधेन्यो भवंतीति त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यावृत्तितः सप्तद
शत्वं भवति। एवमिहाप्यावृत्तितोऽनेकात्वं भविष्यति। भवेदावृत्तिकार्यं भैं परिहृतं। इह
तु खलु किरिणा गिरिणेत्येकाज्लक्षणं भत्वोदात्तत्वं प्राप्नोत्येव। एतदपि सिद्धं।
कथं। लोकतः। तद्यथा। ऋषिसहस्रमेकां कपिलां एकैकशः सहस्रकृत्वो दत्वा तया सर्वे
ते सहस्रदक्षिणाः संपन्नाः। एवमिहाप्यनेकात्वं भविष्यति। यदप्युच्यते। द्रव्यं चोपचा
रः प्राप्नुवंतीति। भवेद्यदसंभवि कार्यं तन्नानेको युगपत्कुर्यात्। यत्तु खलु संभ
विकार्यं भनेकोपि तद्युगपत्करोति। तद्यथा। घटेन दर्शनं स्पर्शनं वा। संभविचे
दं कार्यं भकारस्योच्चारणं नामानेकोपि तद्युगपत्करिष्यते॥ इत्येति

शिवः ५

ततिकर्मधारयेंसाक्षादृषिभिः संबंधः। षष्ठीसमासेतु सामर्थ्यलक्षणः संबंधः। यथा ब्राह्मणशतं भोज्यतामिति भुंजेर्ब्राह्मणैः
संभविचेति। एकस्यैवाथाकारस्य युगपत्स्यानकरणनिष्पन्न ध्वनिव्यंग्यत्वात् सर्वे इत्यर्थः॥ ॥श्रीः॥ रामजी॥ कृष्णजी॥

समाप्तः। ३। पस्य

© Dharmartha Trust J&K. Digitized by eGangotri

एवं परिहृतेष्वपि दोषेषु तत्र न्यायेनाकारस्य भेदं साधयति। आन्यभाव्यमिति। अन्यस्य भावोऽन्यभावः। ततो ब्राह्मणादित्वात् स्वार्थे विधाना
भावे ष्यञ्। अथवान्यो भावोऽन्यद्रूपं तस्य भाव इति भावे ष्यञ्। इह कालशब्दाभ्यां व्यवधानं दृष्टं। यथा प्रश्लिष्टायां अइउ इ
त्यादीनां कालव्यवायः। दधि रिसादोः शब्दव्यवायः। तकारेण अकारेकारयोर्व्यवधानात्। एकत्वे तु व्यवधानं न दृष्टं। यथा अइ इति केव

आन्यभाव्यं तु कालशब्दव्यवायात्। आन्यभाव्यमकारस्य। कुतः। कालव्यवायात्। शब्दव्यवायाच्च। का
लव्यवायात्। दण्ड अग्रं। शब्दव्यवायात्। दण्डः। न चैकस्यात्मनो व्यवायो न भवितव्यं। भवति चेद्व्य
वायान्यभाव्यमकारस्य। युगपच्च देशपृथक्त्वदर्शनात्। युगपच्च देशपृथक्त्वदर्शनादन्याम
न्ये आन्यभाव्यमकारस्येति। यदयं युगपद्देशपृथक्त्वेषूपलभ्यते। अश्वः अर्कः अर्थ इति। न ह्येको दे
वदत्तो युगपत् स्रुघ्ने च भवति मथुरायां च। यदि पुनरिमे वर्णाः शकुनिवत् स्युः। तद्यथा। शकु
नय आशुगामित्वात् पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते एवमकारो दण्ड इत्यत्र दृष्टो अग्र इत्यत्र दृश्येत। नैवं
शक्यं। अनित्यत्वमेवं स्यात्। नित्याः शब्दाः। नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमन
पायोपजनविकारिभिः। यदि चायं दण्ड इत्यत्र दृष्टो अग्र इत्यत्र दृश्येत नायं कूटस्थः स्यात्॥

युगपत्

नपुरस्तात्

... दात्तादिभेदात् कालशब्दव्यवायाच्च नानात्वमकारस्य। प्रत्यभिज्ञानं चात्वादिसामान्यनिबन्धनं। यद्यपि शब्दव्यवा
याकारद्व्यार्थिनि तस्मादुदात्तादिभेदात् कालशब्दव्यवायाच्च ... शब्दव्यवायश्च। यदि पुनरिति। कालशब्दाभ्यां व्यञ्जकानां भेदे ... ध्वनीनां व्यवा
योऽस्ति तथापि कालव्यवाय एवं द्विधा दर्शितं ... व्यक्तिस्फोटवादिनो भावः। यथा शकुनिः पञ्जरे ... आशुसञ्चारात् ... नयति। एवं व्यञ्जकध्वनिसन्निधानात् सन्निधा
नात्मकस्येति व्यक्तिस्फोटवादिनो भावः। ... जातिस्फोटवादी व्यक्तिस्फोटवादिनं पर्यनुयुङ्क्ते। अनित्यत्वमिति। भवता जातिस्तावन्नाभ्युपगम्यते।
व्यक्तेरेवैकत्वनित्यत्वप्रतिज्ञानात् ... नित्यत्वं नोपपद्यते। दण्ड इत्युदात्तानुदात्तभेदेन भिन्नत्वात् ... परित्यागेनानुदात्त

© Dharmartha Trust J&K. Digitized by eGangotri

यत्किंस्फोटवाद्याह। अकारमपीति। श्रोत्रोपलब्धिरिति। श्रोत्रोपलब्ध्या आकाशदेशत्वं प्रतिपादयति। आकाशप्रदेशविशेषस्य श्रो-
त्राख्येन्द्रियाणामसंबद्धविषयग्रहणं श्रोत्रस्य निष्क्रियत्वाज्जननाभावादाकाशदेशत्वं शब्दस्यावश्यमभ्युपेयं। बुद्धिनिर्ग्राह्य इति।
पूर्वपूर्वध्वन्युपसादिताभिव्यक्तिजसंजनितसंस्कारपरंपराप्राप्तपरिपाकान्त्यबुद्धिनिर्ग्राह्य इत्यर्थः। प्रयोगेणेति। प्रयुज्यत
इति प्रयोगो ध्वनिः तेनाभिव्यक्तः देशभेदेन तु प्रतिभासो भिन्नदेशावस्थितपुरुषोदीरिताभिव्यंजकध्वनिकृतः। नेदं वाधाह। आ

२६

यदि पुनरिमे वर्णा आदित्यवत्स्युः। तद्यथा। एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्य-
ते। विषम उपन्यासः। नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते। अ-
कारं पुनरुपलभते। अकारमपि नोपलभते। किं कारणं। श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयो-
गेणाभिज्वलित आकाशदेशः शब्दः। एकं च पुनराकाशं। आकाशदेशा अपि बहवः। यावता ब-
हवः तस्मादाकाशदेशान्यत्वमकारस्य। आकृतिग्रहणात्सिद्धं। अवर्णाकृतिरुपदिष्टा सर्वमव-
र्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः तथोवर्णाकृतिः। न सिध्यति तपरकरणं। एवं च कृत्वा
तपराः क्रियन्ते। आकृतिग्रहणेनातिप्रसक्तमिति। ननु च सवर्णग्रहणेनातिप्रसक्तमिति
कृत्वा तपराः क्रियेरन्। प्रत्याख्यायते तत्सवर्णग्रहणम्। परिहृतमाकृतिग्रहणादणेत्वाच्चेति॥

पुगपत्   चि

काशदेशा इति। यथा घटविप्यादेकस्यापि सुघ्नमथुरादिदेशव्यवहारः। एवमाकाशस्यासंयोगिघटादिपदार्थावच्छेदेन व्यवहार इत्यर्थः। ए-
वं व्यक्तिस्फोटपक्षे निराकृते जातिस्फोटपक्ष एवाश्रीयते। आकृतिग्रहणादिति। आकारजातिः सर्वत्र देशेषु निर्दिश्यते। नान्तरीयकत्वाद्व्यक्ते-
र्निर्देशः। तत्र प्रत्याहारेऽकारजाते निर्देशात् तस्याश्च विवृतत्वप्रतिज्ञानात् तस्यामेव प्रतिपत्तिविधानात् तदेवं जातिनिर्देशात् वृत्तिविनि-
र्देशस्य नाकारेण ग्रहणमकारस्येति सिद्धं। अथ च आविष्कृताविसत्र सत्यपि जातिनिर्देशे दीर्घोच्चारणसामर्थ्याद्ध्रस्वस्य ग्रहणं न भवति।

९ न्यने शिवः   भ. भाष्य

© Dharmartha Trust J&K. Digitized by eGangotri

अन्यथा ह्रस्वमेवोच्चारयेत् । प्लुतश्च विषये स्मृत इति न्यायात् प्लुत [illegible] स्याग्रहणं । तद्धस्वेति । स आकृतिपक्षो यत्राश्लित
तद्वत् । अथवा वर्तने तत् । तत्र न्याये नाकृतिपक्षस्य स्थापितत्वात्परेषामपि स एव पक्षः स्यादित्यर्थः । हल्ग्रहणेषु चेति । अवधा
रयणीयता आकृतिपक्षस्य दर्शयति । व्यक्तिपक्षे ह्येकस्यैव तकारस्यानुकरणं स्वपक्षं तपेस्त्रत इति द्वयोस्लकारयोर्न ल्वं

हल्ग्रहणेषु च । किं । आकृतिग्रहणात्सिद्धमित्येव । झलो झलि । अवात्तां । अवात्तं । अवात्त । यत्रै
तन्नास्ति अण् सवर्णान्गृह्णातीति । रूपसामान्याद्वा । रूपसामान्याद्वा सिद्धमेतत् । तद्यथा
तानेव शाटकानाच्छादयामः ये मथुरायां । तानेव शालीन्भुञ्ज्महे ये मगधेषु । तदेवेदं भवतः
कार्षापणं यन्मथुरायां गृहीतं । अन्यस्मिंश्चान्य रूपसामान्यात्तदेवेदमिति । एवमिहापि
रूपसामान्यात्सिद्धं ॥ ॥ ऋलृक् ॥ ॥ अथ लकारोपदेशः किमर्थः । किं विशेषेण लकारोप
देशश्चोद्यते न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते । यदि किंचिदन्येषामपि वर्णा
नामुपदेशे प्रयोजनमस्ति लकारोपदेशस्यापि तद्वक्तुमर्हति । को वा विशेषः । अयमस्ति
विशेषः । अस्य हि लकारस्याल्पीयांश्चैव प्रयोगविषयः ॥

न स्यात् । अपि त्वेकस्यैव स्यात् । अवात्तामित्यत्र सिज्लोपो न स्यात् अभित्थाः इत्यादावेव स्यात् । रूपसामान्यादिति । व्यक्तिनिर्देशेपि
भेदापरामर्शेन लोकवद्भेदव्यवहारे स्थलीति सिद्धमिष्टं । व्यक्तिव्यतिरिक्तं सामान्यं न वस्तु वा मा भूत् सर्वथा लोकवच्छास्त्रे व्यवहार
इत्यर्थः ॥ ॥ ऋलृक् ॥ ॥ अल्पीयानिति । ऋकारापेक्षयायं प्रकर्षः । ऋकारस्याल्पः प्रयोगस्ततोप्यल्पतर इत्यर्थः ॥ ॥श्रीः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰ के॰

अल्पप्रयोगार्थमप्युपदेशः कर्तव्य इत्याशंक्याह। यश्चापीति। तत्र ऌकारो वस्याप्यामेवोदात्तादिषु रूढेषु स्थानेंतरतम इति स्थानिसदृशो ऌकारो भविष्यति। यदृच्छेति। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्तुरिच्छामेव पुरस्कृत्य प्रवर्त्तते स यदृच्छाशब्दो डित्थादिः। ऋकारऌकारयोः सवर्णविधिरित्यस्य वार्त्तिकस्य ऋकारवाक्यत्वात् ऌकारेण नाप्यनेन तस्मादत्र ऌकारोपदेशः कृतः। अर्थवत्त्वात् ...

२७

यश्चापि प्रयोगविषयः सोपि क्लृपिस्थस्य। क्लृपेश्च लत्वमसिद्धं। तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यंतीत्यनार्थ ऌकारोपदेशेन। अत उत्तरं पठति। ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुताद्यर्थः। ऌकारोपदेशः क्रियते। यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुताद्यर्थश्च। यदृच्छाशब्दार्थस्तावत्। यदृच्छया कश्चिल्लृतको नाम तस्मिन्नच्कार्याणि यथा स्युः। दध्य्लृतकाय देहि। मध्व्लृतकाय देहि। उदङ्ङ्लृतको गमनं। प्रत्यङ्ङ्लृतको गमनं। चतुष्टयी शब्दानां प्रवृत्तिः। जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः। अशक्तिजानुकरणार्थः। अशक्त्या कयाचिद्ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तं तस्यानुकरणं ब्राह्मण्य्लृतक इत्याह। कुमार्य्लृतक इत्याह। प्लुताद्यर्थश्च ऌकारोपदेशः कर्त्तव्यः। के पुनः प्लुतादयः। प्लुतिद्विर्वचनस्वरिताः। क्लृ३प्तशिखः। क्ल्क्लृप्तः। प्रक्लृप्तः। प्लुत्यादिषु कार्येषु क्लृपेर्लत्वं सिद्धं। तस्यासिद्धत्वादच्कार्याणि न सिध्यंति। तस्माल्लृकारोपदेशः क्रियते।

ऌ

27

शिवः

युक्तमत्र यदृच्छाशब्दाः संतीत्यवगम्यते। गाव्यादीनां तु गवादिनिव ...
त॰ ...त्वादसाधुत्वं। ऋतकशब्दस्त्वर्थाश्रयेणैव विनियुक्त इति ऋतकशब्दस्यानि... तेन कोशक्तिजानुकरणस्य जातिशब्दत्वमिति इति। यस्मादनुक्रियमाणशब्दे या जातिः समवेता तत्संबद्धमनुकार्यमनुकरणं प्रत्याय

७

© Dharmartha Trust J&K. Digitized by eGangotri

न्याय्यभावादिति। ऋतकशब्दो न्याय्यः। कृदन्तं नाम कुर्यादिति स्मृतानुक्तत्वात्। ऋतिः सौत्रो धातुः। ततः औणादिकः कुन्। शिलिसंज्ञयोरपूर्वस्या
चीति कुन्प्रत्ययः। संज्ञादिष्विति। आदिशब्देन तद्दर्शयति गुणक्रियानिमित्ता अपि शास्त्रान्विताः प्रयोक्तव्या इति। सर्वशब्दव्युत्पत्तिप
क्षे किमर्थं लृतक इति चेत् शिष्टप्रयुक्तानां व्युत्पत्तिपक्षोऽप्यस्तीति ज्ञापनार्थमर्थवत्सूत्रोपादानं अनुकरणशब्दानां व्युत्पन्नत्वे

नैतानि सन्ति प्रयोजनानि। न्याय्यभावात्कल्पनं संज्ञादिषु। न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं सं
ज्ञादिषु साधु मन्यन्ते। ऋत एवासौ न लृतक इति। अपर आह। न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति स
कल्पयितव्यः साधुः संज्ञादिषु ऋतक एवासौ न लृतकः। अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः। लृफि
ड्डः लृफिड्डश्चेति। एषोऽपि ऋफिडः ऋफिड्डश्च। कथं। आर्त्तिप्रवृत्तिश्चैव लोके दृश्यते। लृश्यते फिडफि
ड्डौ वौणादिकौ प्रत्ययौ। त्रयी च शब्दानां प्रवृत्तिः। जातिशब्दा गुणशब्दाः क्रियाशब्दा इति। न सन्ति य
दृच्छाशब्दाः। अन्यथा कृत्वा प्रयोजनमुक्तमन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा
प्रयोजनमुक्तं। न सन्तीति कृत्वा परिहारः॥

वात्तदर्थं च। अपर आहेति। पूर्वमुक्तं ऋतकशब्द एव न्याय्यत्वादाश्रयितव्यः न तु लृतकशब्द इति। इदानीं तु ऋतकशब्दस्यैवायमप
शब्दोऽशक्तिजत्वात् लृतक इत्युच्यते। अयं तर्हीति। ऋतकशब्देनान्वाख्यातत्वाद्भवतु वा लृतकशब्दस्य निवर्त्तकः। ऋफिड्ड ऋफिड्डश
ब्दौ तावदनन्वाख्याताविति कथं लृफिडलृफिड्ड इत्येतयोर्निवर्त्तकौ स्यातामिति भावः। एषोऽपीति। उणादयो बहुलमित्येवान्वा
ख्यातावित्यर्थः। आर्त्तिप्रवृत्तिरिति। आर्त्तः प्रकृतित्वेन प्रवृत्तिरित्यर्थः। न सन्तीति। अथ पदे पि यदृच्छया नाम क्रियते तदा प्रशस्य रू
पा क्रिया गुणो वा आरोप्यत इति भावः। अन्यथा कृत्वेति। व्युत्पत्तिपक्षाश्रये सा

© Dharmartha Trust J&K. Digitized by eGangotri

समानेचेति। इरुच भिन्नार्थत्वं। लृलकरणेद्धि यदासंज्ञात्वेन विनिपुज्यते क्वचित् लिङ्गे तदात च्छ इस्वरूपा ध्यासः। अन्यके नाविपर्ययः भिन्नस्वरूपो न्वेलोद्देशशब्दो इति भावः। पक्षांतरे रपीति। यथाद्यपक्षे सरूपाणामिन्नस्यारंभः। जातिपक्षे तु प्रत्याख्यानं। एवम स्यापीत्यर्थः। अन्वुसन्न संज्ञाशब्दपक्षोपिपारंपर्यागताः शिष्टप्रयुक्ताः एवसंज्ञाः कर्त्तव्याः। अप्रयोजनांतरमपिवार्त्तिकका

समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्त्तको भवति। तद्यथा। देवदत्तशब्दो शशब्दे वदित्तशब्दं निवर्त्तयति। नगाव्यादीन्। नैष दोषः। पक्षांतरैरपि परिहारा भवंति। अनुकरणं शिष्टाशिष्टप्रतिषिद्धेषु यथा लौकिकवैदिकेषु। अनुकरणं हि शिष्टस्य धुसो भवति। अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय नाभ्युदयाय। यथा लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतांतेषु। लोके तावत्। य एवमसौ ददातिय एवमसौ यजते य एवमसावधीत इति तस्यानुकुर्वन् दद्याच्च यजेत चेसोप्यभ्युदयेन युज्यते। वेदेपि य एवं विश्वसृजः स त्राण्यध्यासत इति तेषामनुकुर्वन् तद्वत्सत्राण्यध्यासीत सोभ्युदयेन युज्यते। अशिष्टाप्रतिषिद्धं य एवमसौ हिक्कति य एवमसौ हसति य एवमसौ कंडूयतीति तस्यानुकुर्वन् हिक्केच्च हसेच्च कंडूयेच्च नैव तद्दोषाय नाभ्युदयाय। यस्त्वेवमसौ ब्राह्मणं हंति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् स्यात् तानुलिप्तो ब्राह्मणं हन्यात् सुरां वापिबेत् सोपि मन्ये पतितः स्यात्। शिष्टः

रः प्रत्याचष्टे। अनुकरणमिति। अनुकार्यस्य दुष्टत्वादनुकरणस्यापि दुष्टत्वं मन्यते सुरापानानुकरणवत्॥ ॥ समः॥ श्रीः॥

© Dharmartha Trust J&K. Digitized by eGangotri

विषमइति। नानुकार्यस्य दोषेणानुकरणस्य दुष्टत्वं विहितकरणाद्धर्मोत्पत्तिः प्रतिषिद्धाचरणाच्चाधर्मोत्पत्तिः। न त्वनुमानेन धर्माधर्मयो र्व्यवस्थेति मन्यते। सुरापानादौ तु तस्या एव क्रियाया अनुष्ठानात् तदभावान्नास्ति अनुकरणस्य दानादीनां स्मार्तत्वात् लोके किं कल्प्यमुच्यते स्नातानुलिप्त इति। स्वस्थचित्तत्वं दर्शयति। अस्वस्थेन हि चित्तेन हि अकार्यं क्रियते। माल्यगुणकण्ठ इति। लोकमध्ये प्रकाश्य इत्यर्थः। अकार्यं

विषम उपन्यासः। यश्चैवं हन्ति यश्चानुहन्ति उभौ तौ हतः। यश्चापि पिबति यश्चानुपिबति उभौ तौ पिबतः। यस्तु खल्वेवं ब्राह्मणं हन्ति सुरां वा पिबतीति तस्यानुकुर्वन् [illegible] अनुकुर्वन् स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत् न स ब्रह्महा स्यान्न सुरापः पतितः स्यात्। एवमिहापि य एवासावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत सोऽप्यपशब्दभाक् स्यात्। अयं त्वन्योऽपशब्दपदार्थकः शब्दो यदर्थमुपदेशः कर्त्तव्यः। न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति। अवश्यं चैतदेवं विज्ञेयं। यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति अपशब्द इत्येव तस्यापशब्दः स्यात्। न चैषोऽपशब्दः। अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः यदर्थमुपदेशः कर्त्तव्यः। साध्वकारमधीते। मध्वकारमधीत इति कस्यस्य पुनरेतदनुकरणं प्लुतस्य [illegible] यदि प्लुतस्य प्लुतस्य खल्वेवमासिद्धं न स्यात् असिद्धत्वात् कारणे वा कार्याणि भविष्यन्ति।

कार्यं प्रकाशं क्रियते। लौकिकशब्दोऽपि यदा कृतकार्ये प्रयुज्यते तदापशब्दः। यदा त्वनुकार्यं प्रत्याययति तदा साधुरेव। अर्थ [illegible] तु। अस्वगोण्यादिवत्। अपशब्द इत्येवेति। अस्य हि गाव्यादयोऽपभ्रंशाः वाच्याः अयमिति। असाधोरनुकरणमिति तदप्यन्वास्ती

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰

२९

भवेदिति। प्रयोगस्य स्यादनुकरणं प्रयोगे च नास्ति पूर्वत्रासिद्धमिति भावः। प्रकृतिवदिति। तत्र यथा लोपे लं त्वस्यासिद्धत्वा
दृकारद्वारेण लकारस्यान्ककार्यं तथानुकरणस्यापीत्यर्थः। द्विरिति। पचं त्वं पचं त्विति केनचिदुक्ते द्विःपचं त्विसनुकरणं। एत
च्च क्रियासाधनाय न तिघाताभिङं तं भवति। एवमग्नी इत्यनुकरणं च पर्यान्नेऽभिधानात्र द्विवचनांतं। न नु गम्लृ स्रृ इत्यादिस्य यदानुकर
णं तदा कथं प्रकृतिभावः। घुताद्युद्लिदित इति ल्लकारे परतोयणादेशकरणादितसंज्ञानुवादाच्च भावनुबंधस्य लृकारस्यानुबंधकार्या

स्य

२९

भवेत्तद्रूपेण नार्थः स्यात्। अयं त्वन्यः लृ पिस्य पदार्थकः शब्दः प... उपदेशः कर्त्तव्यः। न कर्त्तव्यः।
इदमवश्यं कर्त्तव्यं। प्रकृतिवदनुकरणं भवतीति। किं प्रयोजनं। द्विःपचंत्विसाह तिङ्ङितिङ इति
निघातो यथा स्यात्। अग्नी इत्याह। ईदूदेद्द्विवचनं प्रगृह्यसंज्ञं भवतीति प्रगृह्यसंज्ञा यथा स्यात्
यदि प्रकृतिवदनुकरणं भवतीत्युच्यते। अयथा शब्द एवासौ भवति कुमार्य्यलेतक इत्याह ब्राह्म
ण्यूतक इत्याह। अपशब्दो ह्यस्य प्रकृतिः। न चापशब्द प्रकृतिः। न ह्यपशब्दा उपदिश्यन्ते। न चानु
पदिष्टा प्रकृतिरस्ति। एकदेशविकृतस्यानन्यत्वाल्लृसाद्यः। एकदेशविकृतमनन्यवद्भव
तीति लृसादयो पि न विष्यंति। यद्येकदेशविकृतमनन्यवद्भवतीत्युच्यते। राज्ञः क च राजकी
यं। अल्लोपोन इति लोपो प्राप्नोति॥

शिवः

प्यनुमीयंते। ततस्तदनुकरणस्य सिद्धः प्रकृतिवद्भावः। न चापशब्द इति। सिद्धांतवादी। प्र
करणाद्धि शास्त्रीया प्रकृतिराश्रीयते। शास्त्रानिबंधनं च कार्यं भातिदिश्यते। अपशब्दश्च न शास्त्रीया प्रकृतिरनुपादिष्टत्वात्। न चापश
ब्दस्य शास्त्रीयं कार्यं नापि तद्वतिदेष्टुं शक्यं। न हि साधोरसाधुत्वातिदेशो युक्तिमान्। एवं भाष्यकारेणाशंकितानुकरणार्थस्य लकारोपदेशस्य
स्थापितं। एकदेशविकृतस्येति। ककाररेफभागस्य लेकृते स एव ककार इति प्रत्यभिज्ञानोदित्यभावः॥

२

© Dharmartha Trust J&K. Digitized by eGangotri

षष्ठीनिर्दिष्टस्येति। राज्ञः कचे त्यत्र राजन्‌शब्दः षष्ठीनिर्दिष्टः नलन इति लोपाभावः। यद्येवं कृपो रो ल इत्यत्रापि ऋकारः षष्ठ्या न निर्दिष्ट इ
त्यनन्यत्वं प्राप्नोतीत्याह। यदीति। अथवेति। षष्ठीनिर्दिष्टस्येति नापेक्ष्यते। नकारान्तस्येति। न च राजन्‌शब्दः कादेशेन कृतेन नकारान्तो भवति
श्ववपुच्छे छिन्नपुच्छवानिति भावः। अच्वत इति। शेष्यास्तीति निर्यमितिनित्ययोगे मतुप्‌। तेन ऋकार एवर खवान्‌ न लृवर्त्तक इत्याशय

एकदेशविकृतमनन्यवत्‌ षष्ठीनिर्दिष्टस्य। यदि षष्ठीनिर्दिष्टस्येत्युच्यते क्लृप्तशिख इति
लुतो न प्राप्नोति। न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः। कस्तर्हि रेफः। ऋकारोप्यत्र षष्ठीनिर्दिष्टः। क
थं। अविभक्तिको निर्देशः। कृपउः रः लः कृपो रो ल इति। अथवा पुनरस्तु अविशेषेण। ननु चो
क्तं राज्ञः कच राजकीयं। अल्लोपोन इति प्राप्नोतीति। नैष दोषः। वक्ष्यत्येतत्‌ श्वादीनां संप्र
सारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति। तत्सकृतमुत्तरत्रानुवर्त्तिष्य
ते। अल्लोपोनः नकारान्तस्येति। इह तर्हि क्लृप्तशिखः। अन्रत इति प्रतिषेधः प्राप्नोति। र
वत्प्रतिषेधाच्च। रवत्प्रतिषेधाच्चैतत्सिध्यति। गुरोररवत इति वक्ष्यामि। यद्यरवत इत्यु
च्यते। होतृऌकारः होतृकारः अत्र न प्राप्नोति। गुरोररवतः ह्रस्वस्येति वक्ष्यामि। स एष सू
त्रभेदेन कृतो लकारोपदेशः प्लुत्यर्थः सन्‌ प्रत्याख्यायते सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते॥

कारः। नरवान्‌ अरवानिति नित्ययोसमासः। नित्ययोगप्रतिपादनायबहुव्रीहिर्न कृतः। गुरोररवस्येति। ह्रस्वस्येति। तेन ह्रस्वस्यैव
रवतः प्लुतनिषेधो न दीर्घस्य। वार्त्तिककारस्य लृकारप्रत्याख्यानं निःप्रयोजनमित्याह। सैषेति॥ ॥श्रीः॥ राम॥ कृष्ण॥

© Dharmartha Trust J&K. Digitized by eGangotri

मा॰ कै॰ एओङ्॥ ऐऔच्॥ इदं विचार्यत इति। तपरा न परसंध्यक्षरेषु विचार्यत इत्यर्थः। नन्वोपदिश्येरन्नित्यत्रासत्त्वभूतायद्यपि क्रियाभि धीयते तथापि तु व्यापरामृष्टा सत्त्वरूपतामापादिता विचारक्रियायां कर्मभावमनुभवति। यथा पश्यमृगो धावतीति सरणं दर्श ने। कश्चात्रेति। कार्यकोविशेष इत्यर्थः। इति प्रश्नः। तपरोपदेशश्चेदिति। यद्यप्युपदेश उच्चारणं तथापि तपरोपदेशे फलं चेदस्ति।

एओङ्॥ ऐऔच्॥ इदं विचार्यते। इमानि संध्यक्षराणि तपराणि वोपदिश्येरन्। एत् ओत् ङ्। ऐत् औत् च् इति। अतपराणि वा यथान्यासमिति। कश्चात्र विशेषः। संध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणं। संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्त्तव्यं। प्लुत्यादिषु ज्विधिः। प्लुत्यादिषु ज्नाश्रयो विधिर्न सिध्यति। गो३त्रात। नौ३त्रात इत्यत्रानचि चे अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति। इक्प्रत्यङ्के इति कायन। उदङ्को ऽपगव इति अचीति ऊम्मुङ्‌देशो न प्राप्नोति। प्लुतसंज्ञा च। प्लुतसंज्ञा च न सिध्यति। ऐ३ इति कायन। औ३पगवः। ऊकालोऽज्ह्रस्वदीर्घप्लुतसंज्ञो भवतीति प्लुतसंज्ञा न प्राप्नोति॥

शिवः

ततस्तपरोच्चारणं कर्त्तव्यमित्यर्थः। संध्यक्षराणीत्यन्वर्था पूर्वाचार्यसंज्ञा। संधीयमानावयवत्वात्। प्लुत्यादिष्विति। प्लुतमभ्युपगम्या कार्याणि न सिध्यन्तीत्युच्यते। प्लुत एव न प्राप्नोतीति दर्शयितुमाह। प्लुतसंज्ञा चेति त्रिमात्रस्याचः प्लुतसंज्ञा विधीयते। तपरत्वे च त्रिमात्रस्याग्रहणादच्त्वाभावः। तत्रैचां प्लुतो विधीयमानः इकारोकाराभ्यां गृहीत ई कार ऊकारश्च स्यात्॥ ॥श्रीः राम जी॥

१०

अतपर इति। असतीह तपरत्वे एकारो कारा भ्यां मात्रिकयोरईकाराऽऔकारयोर्ग्रहणं द्र्द्धाद्धि धानं स्यादिति सूत्रं कर्तव्यं। तपरत्वेतु तयोर
ग्रहणाल्लाघ्यभावः। ननु चेति। सूत्रारंभं प्रतिन कश्चिद्विशेष इत्यर्थः। अतपरत्वे एच इतिवक्तव्यं तपरत्वे ऐचइति। तयोर्विश्लिष्टवर्णत्वा
त्वं। श्लिष्टवर्णत्वर्द्ध्यकारोऽई ओकारो भवतः। एचोश्चेति। अईमात्रा वर्णस्याध्यर्द्धमात्रे वर्णो वर्णयोः भूयसा व्यपदेशेन सन्त्यकारादि

संतु तर्हि तपरकरणं। अतपर एच इग्घ्रस्वादेशे। यद्य तपरकरणं एच इग्घ्रस्वादेश इति वक्तव्यं।
किं प्रयोजनं। एचोऽऊ स्वशासने ष्वईएकार अईओकारो वा मा भूदिति। ननु च यस्मापित पुर
णितेनाप्यनेह वक्तव्यं। इमावैचौ समाहार वर्णौ मात्रावर्णस्य मात्रे वर्णो वर्णयोः। तयोः ह्रस्वादेश
शासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ मा कदाचिदवर्णं भूदिति। प्रत्याख्याय
ते एतत्। ऐचोश्चोत्तरभूयस्त्वादिति। यदि प्रत्याख्यानपक्षः इदमपि प्रत्याख्यायते। सिद्ध
मेङः सस्थानत्वादिति। ननु चेङः सस्थानतरावर्द्धएकारो ऽर्द्धओकारः। न तौस्तः। यदि हि
तौ स्यातां तावेवायमुपदिशेत्। ननु च भोश्छंदोगानां सात्यमुग्रिराणायनीया अर्द्धमेका
अर्द्धमोकारं चाधीयते सुजाते ऐ अश्वसूनृते अध्वर्यो अद्रिभिः सुतं शुक्रं ते ऐ अन्य घजं ते ऐ अन्यदिति।

तौ कारोकारावेव भविष्यतः। सिद्धमेङ इति। अर्द्धएकाराद्धौकारौ न स्तः। तत्रतालव्य एकार ओष्ठ्य ओकार इति तयोः स्थाने इकारएकारा
वेव भविष्यतः। तावेवेति। ताभ्यामुपदिष्टाभ्यां दीर्घप्लुतयोरपि ग्रहणं सिध्यतीति भावः। गुणसंज्ञायां तु दीर्घानेकारौकारौ निर्द्दिष्टौ।
सुजातेइति। अंतः पारस्यस्याव्यपरस्याकारस्यार्द्धमेकारमर्द्धमोकारं च विदधाति॥

अश्वसूनृते ं दोगानां २

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰ कै॰ पारिषदकृतिरिति। गीतिवशादुच्चारणमिसर्पः। आनर्यत इति। अन्यस्यासंभवादिदमत्र नास्ति प्लुतस्य विषये स्मर्तत इति। अम्येक इ

३१ पारिषदकृतिरेषा तत्र भवतां नैव हि लोके नान्यस्मिन्वेदे ऽर्द्ध एकारो ऽर्द्ध ओकारो वास्ति। एकादेशो दीर्घग्रहणं एकादेशो दीर्घग्रहणं कर्त्तव्यं। आद्गुणो दीर्घो वृद्धिरेचि दीर्घ इति। किं प्रयोजनं। आं नर्यतास्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः खट्वा उदकं खट्वोदकं खट्वा ईषा खट्वेषा खट्वा ऊढा खट्वोढा खट्वा एलका खट्वैलका खट्वा ओदनः खट्वौदनः खट्वा ऐतिकायनः खट्वैतिकायनः खट्वा औपगवः खट्वौपगव इति। तत्तर्हि दीर्घग्रहणं कर्त्तव्यं। उपरिष्टाद्योगविभागः करिष्यते। अकः सवर्णे एको भवति ततो दीर्घः दीर्घश्च भवति यः स एकः पूर्वपरयोरित्येवं निर्दिष्ट इति। इहापि तर्हि प्राप्नोति पक्त्वावि इं पचन्तीति। नैष दोषः। इह तावत्स्यादुमिति अम्येक इतीयता सिद्धं सोयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति। विद्धमिति पूर्वइत्येवानुवर्त्तते। अथवा आचार्यप्रवृत्तिर्ज्ञापयति नानेन संप्रसारणदीर्घो भवतीति यत्ययं हल उत्तरस्य संप्रसारणस्य दीर्घत्वं शास्ति। पचन्तीस तागुण इतीयता सिद्धं सोयमेवं सिद्धे सति शिवः

ति। प्रत्यययोरिति सिद्धे एतदपि किमर्थमिमुच्यते इति चेत्तवार्थं इस्सीमत्रानुवृत्त्यर्थं। तस्मात्पूर्वश्रुतिः पूर्वरूपार्था सैवोत्तरत्रानुवर्त्तत इति वि द्धमिति पूर्वरूपं भविष्यति। अथवेति। विधिनियमसंभवे च विधिरेव बलीयानिति विधेर्बलवत्त्वान्नियमो न भवति। हल एव दीर्घत्वं यथा स्यात्

नइत्यादो भाष्यं दिति॥ ११

© Dharmartha Trust J&K. Digitized by eGangotri

तपरे इति। तपरसंज्ञिसरूपवर्णे इति गुणवृद्धिसंज्ञे इत्यर्थः। तादपीति। तत्र मायायामाश्रयणादेकस्यैव द्विशक्तिः स्यादेकशेषाश्रयणाद्वा अने
कार्थाभिधानमिति भावः। वृकुक्षीह्निवादी चोदयति। किं दकार इति। समासद्वयवादी तं प्रत्याह। अथ किं तकार इति। तवर्गे केवल वृ
कुक्षीह्निवादिनो निष्प्रयोजनं तपरत्वं। ऋकारस्यानणत्वाद्भिन्नकालानां ग्रहणाप्रसंगाद्गुणानां चाभेदकत्वात्तत्साध्यार्थस्याभावात्। अ

इह तर्हि खट्वर्श्यमालर्श्य इति दीर्घवचनाद् कारेण आनांतर्यादेकारो कारौ न। तत्र को दोषः। वि
गृहीतस्य श्रवणं प्रसज्येत। नन्वेतत्र क्रियमाणे दोषः तत्र कर्त्तव्यमिति। किं तर्हि यत्र क्रियमा
णे न दोषः तत्र कर्त्तव्यमिति। क्व च क्रियमाणे न दोषः। संज्ञाविधौ। वृद्धिरादैच् दीर्घः अदेङ्गुण इ
ति। तत्तर्हि दीर्घग्रहणं कर्त्तव्यं। न कर्त्तव्यं। कस्मादेवं तर्येत त्रिमात्रचतुर्मात्राणां स्थानि
नां त्रिमात्रचतुर्मात्रा आदेशा न भवंति। तपरे गुणवृद्धी। ननु च तः परो यस्मात् सोयं तपरः। ने
त्याह। तादपि परस्तपर इति। यदि तादपि परस्तपरः ऋदोरबितीह एव स्यात्। यवः स्तवः लवः प
वः इत्यत्र न स्यात्। नैष तकारः कस्तर्हि दकारः। किं दकारे प्रयोजनं। अथ किं तकारे। यद्यसं
देहार्थस्तकारः दकारोपि। अथ मुखसुखार्थस्तकारस्तर्हि दकारोपि।

यद्यसंदेहार्थो मुखसुखार्थस्तकार एवं दकार इत्यर्थः। तित्स्वरितमिति भाष्ये णस्याविरोधः। तत्र हितिर्हितिप्रसंग ग्रहणं चोदि
तं। इत्यत्र भाष्ये तु हिवउत्सुभ्यामिति। ततोदित्वाश्रयणे नप्रसारणस्यानं। तपरसूत्रे दकारस्युत्यक्तो निर्दिश्यते तेन च कालस्याग्रहको
दकार इत्युक्तं। इत्युच दकाराभ्युपगमेन लवादिषु दोषः परिहृतः। अत्राहुः। यकारस्थानिको धकारस्थानिको वा दकारो न विवक्षि

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णांतरसमानाकृतय इति। आकारादिष्वकारादिसदृशावयवा ऋकारऌकारयोरेफलकारसदृशावयवौ। संध्यक्षरेष्वकारेकारोकारस
दृशाः। तत्र केवलवर्णकार्यमवयवेषु भवति न वेति विचारः। इको हि समुदाया अपीति। ऋऌ ए ओ ऐ औ इति। अवयवा अपीति। अइउण्
ऋऌकिति। तत्र समुदायपरे निर्देशे सन्निहिता अप्यवयवा नांतरीयकत्वादेजादिसंज्ञानं न लभंते। अवयवपरे निर्देशे समुदायो
न संज्ञाभाक्। यथाऽऽयातेत्यादावनक्षस्यस्य स्पर्शो दुःखेनोच्चार्यत्वान्निर्देशोऽप्यकारोऽत्र प्राधान्यान्निर्देशादिकादिसंज्ञां न प्रतिप
द्यते इति दध्यत्रेत्यादावनच्क एव यणादेशः प्रवर्तते। तत्रासत्यामप्येजादिसंज्ञायामयादयः समुदायादेशा अपि नांतरीयक
त्वादवयवान्निवर्तयंति। एवं स्थिते अग्न इंद्र इत्यादौ यत्रावयवकार्यप्राप्तौ समुदायकार्यं च तत्रांतरंगत्वात्तत्र च सायाज्ञ्यादिति

इदं विचार्यते। य एतेषु वर्णेषु वर्णैकदेशा वर्णांतरसमानाकृतयः एतेषामवयवग्रहणं स्याद्
न वेति। कुतः पुनरयं विचारः। इको हि समुदाया अप्युपदिश्यंते अवयवा अपि। अभ्यंतर
श्च समुदायेऽवयवः। तद्यथा। वृक्षः प्रचलन् सहावयवैः प्रचलति। तत्र समुदायस्यस्या
वयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा। कश्चात्र विशेषः।

त्वाभ्यासत्वात्परत्वाच्चावयवकार्यप्रसंगः। अवयवावगतिपूर्वकत्वाद्धि समुदायस्यैवगमस्य समुदायकार्यं बहिरंगं। आयादीनां चा
वकाशः। अग्न आयाहीति। नन्वत्र यणादेशोऽवयवस्य प्राप्नोति। येन नाप्राप्ते इति बाधकापवादइति वायण एचायादयो बाधकाः स्युः
तत्र यत्यादौ ध्रुइत्यत्र दधि अत्र ईकारः सवर्णदीर्घत्वं प्रतिपद्यते एवमेकारस्योऽपि विप्रतिपद्येत। प्रत्याहारे ए ओ ङ् ऐ औ जित्य
त्रावयवानां प्राधान्येनानिर्देशाद्दिस्थैवं ग्रहणप्रसंगं काबीजमनुपपन्नस्तं। इदानीमग्रहणप्रसंगो कावीजमनुपपन्नस्यते। अभ्यंतरस्वे
ति। तिरोहितत्वादवयवानां समुदायकार्यपारतंत्र्यात्तत्कार्यस्याप्रयोजकत्वान्न रथिं हव ज्ञात्वांतरयोगाद्वर्णांतरसारूप्यमा
त्रेण तत्कार्यप्रवर्त्तनादिसर्वः॥ ॥श्रीः॥ राम॥

© Dharmartha Trust J&K. Digitized by eGangotri

समानाक्षरेति। समानशब्देन पूर्वाचार्यनिर्देशाद् अकोऽभिधीयंते। दशसमाना इति वचनात्। तेन सवर्णकार्यं प्राप्नोतीत्यर्थः। असिद्धत्वाच्चेति।

वर्णैकदेशा वर्णग्रहणेन चेत् संध्यक्षरे समानाक्षरविधिप्रतिषेधः। वर्णैकदेशा वर्णग्रहणेन
चेत् संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। अग्न इंद्र। वायो उदकं। अत्र कः सव
र्णे दीर्घ इति दीर्घत्वं प्राप्नोति। दीर्घह्रस्वविधिप्रतिषेधः। दीर्घह्रस्वाक्षराश्रयो विधिः प्राप्नोति स प्र
तिषेध्यः। आलूय। प्रलूय। ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति। नैष दोषः। आचार्यप्रवृत्ति
र्ज्ञापयति न दीर्घह्रस्वाश्रयो विधिर्भवतीति। यदयं दीर्घाच्छे तुकं शास्ति। नैतदस्ति ज्ञापकं। अस्ति
ह्यन्यदेतस्य वचने प्रयोजनं। किं। पदांताद्वेति विभाषां वक्ष्यामीति। यत्तर्हि योगविभागं करोति
इतरथा हि दीर्घात्पदांताद्वेत्येव ब्रूयात्। इह तर्हि खट्वाभिः मालाभिः अतो भिस ऐस् इत्यैस्भावः
प्राप्नोति। तपरकरणसामर्थ्यान्न भविष्यति। इह तर्हि याता वाता अतो लोप आर्धधातुके इत्यका
रलोपः प्राप्नोति। ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति। अस्ति ह्यन्यत्तपरकरणे
प्रयोजनं किं। सर्वस्य लोपो मा भूदिति। अपाक्रियमाणे तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भ
वति। परलोपस्य स्थानिवत्त्वादसिद्धत्वाच्च। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य स्याकार
स्य लोपो भवतीति। यदयमातोनुपसर्गे क इति ककारमनुबंधं करोति। कथं कृत्वा ज्ञापकं। किं करणे
असिद्धवदत्राभादित्यनेन॥ (तत्प्रयोजनं कितीत्याकारलोपो यथा स्यादिति। यद्याकारस्याकारस्य लोपः स्या

© Dharmartha Trust J&K. Digitized by eGangotri

मा॰के॰

३२

यत्तर्हीति न न्यसति किं ते आकारस्यस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपस्य धातुं प्रलंतं वक्षावाच्छंदो गायेत्यत्रातो धातोरित्या
कारलोपप्रसंगात्। नैष दोषः। सन्निपात परिभाषया लोपो न भविष्यति। आकारं ह्याश्रित्य यशब्दः कृतो लोपस्यानिमित्तं। दीर्घत्वं तु कस्मा
द्येति निपातनाद्भवति। एकवर्णादिति। अवयव संख्याश्रयणेन वाकुशब्दस्य घन्त्वात्तन्निमित्तं कार्यं प्राप्नोतीत्येकवर्णावदित्यतिदे
शः क्रियते। गोनेत्यग्रहणं ज्ञापकमिति। सामान्येन ज्ञापकं वर्णावयवाश्रयकार्याभावस्य। अग्न एहीत्यादावेङः पदान्तादतीत्याद्य

३३

परस्य अकारस्य लोपे कृते द्वयोरकारयोः पररूपेण। सिद्धं रूपं स्यात्। गोदः कंबलद इति। पश्य
ति त्वाचार्यः नाकारस्यस्याकारस्य लोपः स्यादिति। अतः ककारमनुबंधं करोति। नैतदस्ति ज्ञा
पकं। उत्तरार्थमेतत्स्यात्। तुंदशोकयोः परिमृजापनुदोरिति। यत्तर्हि गापोष्टगित्यननुबंधकं
कारमनुबंधं करोति। एकवर्णवच्च। एकवर्णवच्च दीर्घो भवतीति वक्तव्यं। किं प्रयोजनं। वाचा
तरतीति ठगि ऋलक्षणाष्टन्मा भूदिति। इहच वाचो निमित्तं तस्य निमित्तं संयोगोत्पाताविति घञ्ल
क्षणो यन्मा भूदिति। अत्रापि गोनेत्यग्रहणं ज्ञापकं दीर्घां घञ्लक्षणो विधिर्न भवतीति। अयंतु
सर्वेषामेव परिहारः। नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु। नाव्यपवृक्तस्यावयवस्यावय
वाश्रयो विधिर्यथा द्रव्येषु। तद्यथा द्रव्येषु सप्तदश सामिधेन्यो भवंतीति न सप्तदशरत्निमात्रे

पि भवति। नाव्यपवृक्तस्येति। अपवर्गो व्यपवृक्तं भेदः। तेनाव्यपवृ काष्ठमग्नावभ्याधीयते। विषम उपन्यासः। प्रत्यक्षं चैव हि

शिवः

क्तस्याभिन्नबुद्धि विषयस्यैकत्वात्तं वनज्ञानग्राह्यस्य समुदायस्यायो वयवस्तस्मिंस्तद्विधिः एवंभूतवर्णे विधिर्न भवतीत्यर्थः। अव्यप

१३

वृक्तस्य समुदायस्यायो वयवस्तस्येत्यर्थः। नहि संभवमात्रेण कार्याणि क्रियंते। पिलुपत्रत बुद्धिरस्ति तत्रैवेत्यर्थः। आवाकस्तोकत्वादु
त्ति विषयस्तुमिश्रेष्वपि प्रवर्त्तत तेन तत्र तद्बुद्धितदुत्पादेन संभावात्। सप्तदशेति। सामिधेनी शब्दे कृत वाचक उपचारात्काष्ठेषु वर्त्त

© Dharmartha Trust J&K. Digitized by eGangotri

यथा तर्हीति। अल्पप्राणोवात्वात्संभवद्वित्यर्थः। अव्यपवृक्तमिति। व्यपवर्गस्याभावेनेत्यर्थः। यत्र तर्हीति। ए ओ इत्यत्र हि स्फोटोऽकार
प्रतिभासोऽस्ति। विवृतत्वादिति। अकारस्य ह्रस्वस्य विवृतोपदेशात्तत्र प्रकर्षो विवक्षितस्तदाह। विवृततरमिति। तत्र प्रत्ययत्वाभेदादवा
वर्णादकारेण संध्यक्षरावयवस्य ग्रहणं नास्तीत्यर्थः। तदेवमाकारादिस्वस्यावयवस्य भेदेनाग्रहणादग्रहणं संध्यक्षरस्यास

यथा तर्हि सप्तदशप्रादेशमात्रीरश्वत्थीः समिधोऽभ्यादधीतेति सप्तदशप्रादेशमात्रं काष्ठ
मग्नावभ्याधीयते। अत्रापि प्रतिप्रणवं कर्म चोद्यते। तुल्यश्चासंभवो गोवेपांचा। यथा तर्हि
तैलं न विक्रेतव्यं मांसं न विक्रेतव्यमिति व्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते। यथा लोमन
खं स्पृष्ट्वा शौचं कर्तव्यमिति व्यपवृक्तं स्पृष्ट्वा कृतं च न विक्रीयते। अव्यप स्पृष्टा नियोगः कर्तव्यः
अव्यपवृक्ते कामचारः। यत्र तर्हि व्यपवर्गोऽस्ति। क्व च व्यपवर्गोऽस्ति। संध्यक्षरेषु। संध्यक्षरेषु
विवृततरत्वात्। संध्यक्षरेषु यस्त्रावर्णो विवृततरं तदन्यस्मादवर्णाद्येपी वर्णौ विवृततरे
रेऽन्याभ्यामिवर्णोवर्णाभ्यां। अथवा पुनरस्तु संवृते। अग्रहणं चेल्लुड्विधिलादेशविनामेषु ऋ
कारग्रहणं। अग्रहणं चेल्लुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यं। तस्माल्लुड्विधिः लकारा
रे चेति वक्तव्यं। इहापि यथा स्यात्। आन्वपलः आन्वधुरिति। यस्य पुनर्गृह्यते द्विहलइत्येव तस्यासि

वसावर्णात्। ऋकारस्य स्तु रेफो भेदेन रपति भासा ग्रहणं तेइ इति लुडादिसिद्धिः। अपवति। नरसिंहवद्वर्णान्तरत्वात् सामान्यात्समानार
त्वाभिप्रायेणानुपलभ्यमानां वर्णान्तरां समुदायेनास्ति सत्त्वं। समुदायस्यावयवयुक्तिरपि तत्र वर्णान्तरेन लाक्षिकीभांति वर्णात्वयवयसङ्घा

© Dharmartha Trust J&K. Digitized by eGangotri

अश्नोतेरेवेति। सामान्येनावर्णोपधो निवर्त्यते। सामान्यापेक्षत्वान्नियमज्ञापकत्वस्य। अपि तर्हि किं क इति। तत्र ऋकारनिर्देशसाम
र्थ्याद्विभागं प्रकल्प्यादेशो विधीयते। स्फोटमात्रमितिं जातिस्फोट इत्यर्थः। ततश्चांतर्भूत रेफलकारयोर्ग्रहणं सामान्यस्यानादेशभावेनाश्रीयते।

तस्माल्लुङ् भवतीत्येव। यद्येनं क्रियते। आटतुः आटुरित्यत्रापि प्राप्नोति। अश्नोतिग्रहणं नियमार्थं भविष्य
ति। अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति। नादेशेऽन्वृकारग्रहणं कर्त्तव्यं। कृपो रो लः ऋका
रस्य चेति वक्तव्यं। इहापि यथा स्यात् क्लृप्तः क्लृप्तवानिति। यस्य पुनर्ग्रहणं तेर इत्येव तस्य सिद्धं। तस्यापि
न ग्रहणं ते तस्याप्येष न दोषः। ऋकारोऽप्यत्र निर्दिश्यते। कथं। अपि तर्हि कोऽनिर्देशः। कृप उः रः लः कृपो रो
ल इति। अथवा उभयतः स्फोटमात्रं निर्दिश्यते। रश्रुतेर्लश्रुतिर्भवतीति। विनाप्यृकारग्रहणं कर्त्तव्यं
। रषाभ्यां नो णः समानपदे ऋकाराच्चेति वक्तव्यं। इहापि यथा स्यात्। मातॄणां पितॄणामिति। यस्य पुन
र्ग्रहणं ते रषाभ्यामित्येव तस्य सिद्धं। न सिध्यति। यत्तद् रेफात्परं भक्तेः तेन व्यवहितत्वान्न प्राप्नोति। मा
भूदेवं। अट्कुप्वाङ्नुम्व्यवाय इत्येवं सिद्धम्। न सिध्यति। वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते। ये व्यपवृक्ता अ
पि वर्णा भवन्ति। यच्चापि रेफात्परं भक्तेः न तदेकदेशो व्यपवृक्तं दृश्यते। एवं तर्हि योगविभागः करि
ष्यते। रषाभ्यां नो णः समानपदे। ततो व्यवाये। व्यवाये च रषाभ्यां नो णो भवतीति। ततोऽट्कुप्वाङ्नुम्भिरि
ति। इदमिदानीं किमर्थं। नियमार्थं। एतेरेवाक्षरसमाय केव्यवाये नान्येरि

प्यवाहिति। रेफात्परं भक्तेरिति समानाधिकरणे पंचम्यौ। अव्यवाय इति। ऋकारेणाप्यादीर्घोऽस्यते एव रेकारभागोऽपीत्यर्थः। न सिध्यतीति। तस्य भागस्य स्फुटप्रतिभासाविषयत्वाज्जाल
सियक्तिहेतुत्वाभावाच्चेति भावः। एतेरेवेति। आकारादयोऽप्यकारादिभिः प्रत्यायितत्वादक्षरसमाम्नायिका। नान्यैस्तु न प्रत्याय्यान् प्रत्यायिकेति

शिवः

© Dharmartha Trust J&K. Digitized by eGangotri

गुरोर्ब्वे शिक्षि ऐकारो गुरुस्तस्य टेरिति सिद्धं। तंत्र न्यायाश्रयणाच्च गुरोरपि स्थाने प्लुतो भवति देवदत्ता३ इति। क्रियते न्यास एवेति। अवश्य
कर्त्तव्यतां दर्शयति। अपर इह कोपि भागयोर्विवृततरत्वात् प्रयत्नभेदादिकारोकारौ न्याय्यरूपाणां भेदस्याभावात्। तुल्यरूपे इति। तुल्यरूपा

आचार्यप्रवृत्तिर्ज्ञापयति। भवस्य कारान्तोणास्त्वानिति। यदयं क्षुभ्नादिषु तत्र न मनशब्दं पठति। नैतद
स्ति ज्ञापकं। वृ अर्यमेतत्स्यात्। जानेभनिः यत्तर्हि तिनोति शब्दं पठति। यच्चापि तन्मनशब्दं पठति। तन्के
चोक्तं वृध्यर्थमेतत्स्यात्। न। बहिरंगा वृद्धिः। अंतरंगं णत्वं। असिद्धं बहिरंगमंतरंगे। अथवा उप
रिष्टाद्योगविभागः करिष्यते। ऋतः नो णं भवति। ततश्छन्दस्यवग्रहात्। ऋत इत्येव। प्लुतावै
च इदुतौ। एतच्च वक्तव्यं। यस्य पुनर्गृह्यंते गृह्यंते गुरोरनृत इति वचनात् तस्यासिद्धं। यस्यापि न गृह्यंते तस्या
व्यपदेशः। क्रियते न्यास एव। तुल्यरूपे संयोगे द्विव्यंजनविधिः। तुल्यरूपे संयोगे द्विव्यंजनाश्रयो वि
धिर्न सिध्यति कुक्कुटः। पिप्पल। पित्तमिति। यस्य पुनर्गृह्यंते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। यस्या
पि न गृह्यंते तस्यापि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। कथं। मात्राकालोऽत्र गम्यते। न च मात्रिकं व्यंजनमस्
ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुं। असच्च कथं शक्यं प्रतिपत्तुं। यद्यपि तावदत्र तच्छक्यं तत्वक्तुं यत्र
तन्मात्रास्य एरसवर्णान्न गृह्णातीति। इह तु कथं। सय्यंता। सवत्सरः। यल्लोकं। तल्लोकमिति। यत्र तद
स्य एरसवर्णान्न गृह्णातीति। अत्रापि मात्राकालो गृह्यते। न च मात्रिकं व्यंजनम

वयववात्संयोगस्तुल्यरूपः। तस्मै
रूवर्णत्वं पूर्वपक्षे। सिद्धांते तु वर्णद्वैरूप्यता। आम्रेडनेन तु भ्रांतमेकत्वज्ञानमिति। शिष्टसमाचारः। अत्रापीति। सानुनासिकनिरनुनासिक

© Dharmartha Trust J&K. Digitized by eGangotri

आतो टि नित्यम् अप्रतिकरत: रो: पूर्वस्यान्त: स्थाने नित्यमनुनासिक: महाँ इन्द्र:

भा॰के॰

हयवरट्॥ ॥पूर्वश्चेति। पूर्वं परं चोच्चारणक्रियाभेदादेकस्यैव हकारस्य पूर्वपरव्यपदेशः॥ शश्छोटीति। हकारपरस्याकारस्यासंभवेत

३५

हकार

35

हयवरट्॥ ॥सर्वे वर्णाः सकृदुपदिष्टाः अयं हकारो द्विरुपदिश्यते। पूर्वश्चैव परश्च। यदि पुनः पूर्व एवोपदिश्येत पर एव वा। कश्चात्र विशेषः। हकारस्य परोपदेशे अड्ग्रहणेषु हग्रहणं। हकारस्य परोपदेशे अड्ग्रहणेषु ग्रहणं कर्तव्यं। आतो टि नित्यं दीर्घादटि समानपादे। हकारे चेति वक्तव्यं। महाँ हि सः। उत्वे च। उत्वे च हकारग्रहणं कर्तव्यं। अतो रोरप्लुतादप्लुते। हशि च। हकारे चेति वक्तव्यं। इहापि यथा स्यात्। पुरुषो हसति ब्राह्मणो हसतीति। अस्तु तर्हि पूर्वोपदेशः। पूर्वोपदेशे कित्त्वमकेत्त्वे इड्विधियोः झल्ग्रहणानि। यदि पूर्वोपदेशः कित्त्वं विधेयं। स्निहित्वा स्नेहित्वा। सिस्निहिषति। सिस्नेहिषति। रलो व्युपधाद्धलादेरिति कित्त्वं न प्राप्नोति। क्सविधिः। क्सश्च विधेयः। अधुक्षत्। अलिक्षत्। शल इगुपधादनिटः क्स इति क्सो न प्राप्नोति। इड्विधिः। इट् च विधेयः। रुदिहि। स्वपिहि। वलादिलक्षण इट् न प्राप्नोति। झल्ग्रहणानि च। किं। अहकारा झलः स्युः। तत्र को दोषः। झलो झलि। अदुग्धाम्। अदुग्ध्वं। तस्मात् पूर्व एवोपदेष्टव्यः परश्च। यदि च किंचिदन्यत्राप्युपदेशप्रयोजनमस्ति तत्राप्यु

शिवः

तत्र संयोगोच्चारितमेतत्। उत्वे चेति। अशक्यार्थमपि वक्तव्यं सोऽहसतीति रोर्यत्वार्थं। यदि किंचिदिति। प्रयोजनार्थो हि वर्णानामुपदेशो न स्वरूपप्रतिपत्त्यर्थमित्यर्थः॥ ॥श्रीः॥

दीर्घाद् टि समानपादे॥ दीर्घाद् अकारस्य रु दीर्घाद् टि चेत् ... एकपाद ... स्यात् ... देयं ... महान् ... १५

© Dharmartha Trust J&K. Digitized by eGangotri

द्वदमिति। उभयत्रापि दोषप्रयोजनसद्भावात्प्रश्नः। स्वर्णयतीति। णकारोऽत्र प्राप्नोति। न ह्यत्र सवर्णग्रहणमस्ति। भद्रह्रद इति। द्विर्वचने कृतेऽव
तस्यासिद्धत्वाड्ढ्रो रीति रेफलोपो नास्ति। हलो यमां यमि लोप इति लोपस्तु पाक्षिक इति पक्षे रेफद्वयश्रवणप्रसंगः। कुंडं रथेनेति। अनुनासिकेनैव

इदं विचार्यते। अयं रेफो हकारवकाराभ्यां पूर्व एवोपदिश्येत हयवरडिति। पर एव वा यथान्यास
मिति। कश्चात्र विशेषः। रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः। रेफस्य परोपदेशे
अनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः। अनुनासिकस्य। स्वर्णयति। प्रातर्णयति। यरोऽ
नुनासिकेऽनुनासिको वा प्राप्नोति। द्विर्वचनस्य। भद्रह्रदो भद्रह्रदः। यर इति द्विर्वचनं प्राप्नोति। परसवर्णस्य
कुंडं रथेन। वनं रथेन। अनुस्वारस्य ययीति परसवर्णः प्राप्नोति। अस्तु तर्हि पूर्वोपदेशः। पूर्वोपदे
शे किप्प्रतिषेधो य्वलोपवचनं च। यदि पूर्वोपदेशः किप्प्रतिषेधः। देविवादि देविषति। रलो व्यु
पधादिति कित्वं प्राप्नोति। नैष दोषः। नैवं विज्ञायते रलो व्युपधादिति। किं तर्हि रलः अव्युपधादिति। अव
कारांताद्व्युपधादिति। य्वलोपवचनं च। य्वोश्च लोपो वक्तव्यः। गोधेरः ×किमिदमव्युपधादिति। ×पचेर
न्। जीवेरदानुक्। जीरदानुः। वलीति लोपो न प्राप्नोति। नैष दोषः। रेफोऽप्यत्र निर्दिश्यते। लोपो व्योर्वलीति।
रेफे च वलि चेति। अथवा पुनरस्तु परोपदेशः। ननु चोक्तं रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपर
सवर्णप्रतिषेध इति। अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न व

परसवर्णेन भाव्यमिति नियमाद्वा रेफः प्राप्नो
ति। तस्य चासिद्धत्वाड्ढ्रो रीति लोपो नास्ति। रेफोष्मणामिति। अनुनासिकपरसवर्णविधाने हि स्थानेऽन्तरतमपरिभाषोपस्थानाद्बाधा
वः। न हि रेफस्य णकारोऽन्तरतमः। नाप्यनुस्वारस्य रेफः॥

© Dharmartha Trust J&K. Digitized by eGangotri

नेमो रहाविति। हकारवद्रेफोपि न कार्यीत्यर्थः। तत्रैकवाक्यतायां सामान्यविशेषविज्ञो लोकव्यवहारादेव शब्दार्थसंबंधपरिज्ञानात्सा
मान्यविधेर्विशेषविधिर्बाधकः। प्रत्यक्षश्च विशेषविधिः। सामान्यविधिस्त्वनुमेय इति रेफस्य कार्यित्वं निमित्तत्वेन बाध्यते। द
ध्युदकादौ तु स्थानित्वेन निमित्तत्वमिकः। तस्मादित्युत्तरस्येत्यादिज्ञापकान्न बाध्यते। लक्ष्यस्थित्यपेक्षणाद्वा बाध्यबाधकभावे
न क्वचिदपेक्षा नास्ति। यथा चिचीषतीति दीर्घत्वद्विर्वचनयोः। इष्टमिति। विधानादेषां साधुत्वं स्यात्। प्रत्याहारप्रतिबद्धं तु कार्यं

द्विर्वचनेपि नेमो रहो कार्यिणो द्विर्वचनस्य। किं तर्हि निमित्तमिमो रहो द्विर्वचनस्य। तद्यथा। ब्राह्
मणा भोज्यंतां माठरकौंडिन्यौ परिवेविषातामिति। नेदानीं तौ भुंजाते। इदं विचार्यते। इमे अयोग
वाहाः न क्वचिदुपदिश्यंते श्रूयंते च। तेषां कार्यार्थमुपदेशः कर्त्तव्यः। के पुनरयोगवाहाः। विस
र्जनीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः। कथं पुनरयोगवाहाः। यदयुक्ता व
हंति। अनुपदिष्टाश्च श्रूयंते। क्व पुनरेषामुपदेशः कर्त्तव्यः। अयोगवाहानामट्सु णत्वं। अयो
गवाहानामट्सूपदेशः कर्त्तव्यः। किं प्रयोजनं। णत्वं। उरःकेण। उरःकेण। उरःपेण। उरःपेण।
अड्व्यवाय इति णत्वं सिद्धं भवति। शर्षु जश्भावषत्वे। शर्षूपदेशः कर्त्तव्यः। किं प्रयोजनं। जश्
भावषत्वे। अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद्रूपं यथा स्यात्॥

न प्राप्नोति। के पुनरिति। तत्स्वरूपप्रश्नः। कथमिति। प्रवृत्तिनिमित्तप्रश्नः। अयुक्ता इति। अस्य वहेरनुकथनं अनुपदिष्टाश्चेति। अयुक्ताः
प्रत्याहारलक्षणेन। पाठाभावादसंबद्धा इत्यर्थः। उपदेशो द्विविधः। पाठेन ग्रहणकशास्त्रेण प्रत्यायनं च। स द्विविधोप्येषां नास्तीत्यर्थः। च
शब्दो हेतौ। यतोऽनुपदिष्टास्ततोऽयुक्ता इत्यर्थः। क्वचित्तु चशब्दो न पठ्यते। शर्ष्विति। शर्षु पाठे जश्त्वमिति झलां जश् झशीति जश्त्वं सिध्यति॥

© Dharmartha Trust J&K. Digitized by eGangotri

उपध्मानीयादेरिति। यदि द्विर्वचने पूर्वत्रकर्त्तव्ये जश्त्वमसिद्धं। अथापि पूर्वत्रासिद्धीयमद्विर्वचन इति सिद्धं सर्वथा विब्जिषतीति प्राप्नोति। निपातनादिति। द्विर्वचनं कर्पनिपातनाद्धकारशेषो नुमीयते। असिद्धप्रकरणे स्तोः श्चुना श्चुरिसत्रो कुत्वे भइति। तत्र नन्द्रा इति दकारस्य द्विर्वचनमिति पूर्वत्रासिद्धीयमद्विर्वचन इत्यस्याप्रवृत्तावभत्वस्यासिद्धत्वादिष्टद्विर्वचनसिद्धिः। अथापि न वाक्यशेषाद्भुनानं निपात

यद्युब्जिरुपध्मानीयोपधः पठ्यते उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनर्न न्द्राः संयोगादय इति प्रतिषेधः सिद्धो भवति। यदि दकारोपधः पठ्यते का रूपसिद्धिः उब्जिता उब्जितुमिति। असिद्धं भगुत्वे। इदमस्ति स्तोः श्चुना श्चुरिति ततो वक्ष्यामि। नञुकुः। उञ्जोऽञ्चश्चुना सन्निपाते भो भवतीति। तत्तर्हि वक्तव्यं। न वक्तव्यं। निपातनात्सिद्धं। किं निपातनं। भुजन्युब्जौ पाण्युपतापयोरिति। इहापि तर्हि प्राप्नोति। अभ्युद्गः समुद्गः इति। अकुत्वविषये निपातनं। अथवा नैनं दुब्जो रूपं गमेरेतौ घुपसर्गाड्डो विधीयते। अभ्युद्गतः अभ्युद्गः। समुद्गतः समुद्ग इति। षत्वं च प्रयोजनं। सर्पिःषु धनुःषु। शर्व्यवाय इति षत्वं सिद्धं भवति। नुम्विसर्जनीयशर्व्यवायेपीति शर्ग्रहणं न कर्त्तव्यं भवति। नुमश्चापि तर्हि ग्रहणं शक्यमकर्त्तुं। कथं सर्पींषि धनूंषि। अनुस्वारे कृते शर्व्यवाय इत्येव सिद्धं। अवश्यं नुमो ग्रहणं कर्त्तव्यं। अनुस्वारविशेषणं नुम्ग्रहणं। नुमो योऽनुस्वारस्तत्र यथा स्यात्। इह माभूत् पुंस्विति॥

नन्वेव प्रतिपादकं। तथापि दकारोपदेशसामर्थ्याद् द्विर्वचने कृते दकारस्य बत्वं प्रवर्त्तते। अकुत्वविषय इति। विशिष्टविषयत्वनुमानं नित्यर्थः। अवश्यमिति। अनुस्वारस्य शर्त्वान्तर्भावाय षत्वे सिद्धे नुम्ग्रहणं नियमार्थं। नुमो योऽनुस्वारस्तत्रैव यथा स्यादन्यत्र माभूत् पुंस्विति॥

विसर्जनीय

© Dharmartha Trust J&K. Digitized by eGangotri

(37)

भा॰कै॰ अविशेषेणेति। प्रयोजनं सत्यपेक्षा विशेषणं न नपेक्ष्य सकलप्रयोजनो देशेन यत्र यत्र प्रदेशे प्रयोजनं तस्मिन् सिद्धिः स्यात् तत्रोपदेशः कार्य इ
त्यर्थः। उक्तं क इति। उपध्मानीयस्य जश्त्वे संयोगसंज्ञायां तस्यासिद्धत्वात् संयोगसंज्ञाभावात् गुरुत्वाभावात् प्लुतो न स्यात्। महोरस्केनेति।

३७

27

अथवा अविशेषेणोपदेशः कर्त्तव्यः। किं प्रयोजनं। अविशेषेण संयोगोपधासंज्ञालोंत्याद्विर्वचन
स्थानिवद्भावप्रतिषेधः। अविशेषेण संयोगसंज्ञाप्रयोजनं। ऊ३क्क कः। हलोनंतराः संयोग इति संयो
गसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरिति प्लुतो भवति। उपधासंज्ञा च प्रयोजनं। दुष्कृतं। निष्कृतं। दु
ष्पीतं निष्पीतं। इदुदुपधस्येति षत्वं सिद्धं भवति। नैतदस्ति प्रयोजनं। न इदुदुपधग्रहणेन विसर्ज
नीयो विशेष्यते किं तर्हि सकारो विशेष्यते। इदुदुपधस्य सकारस्य यो विसर्जनीय इति। अथवोप
धाग्रहणं न करिष्यते। इदुद्भ्यां उत्तरं विसर्जनीयं विशेषयिष्यामः। इदुद्भ्यामुत्तरस्य विसर्ज
नीयस्येति। अलोंत्यविधिश्च प्रयोजनं। वृक्षस्तरति प्लक्षस्तरति। अलोंत्यस्य विधयो भवंतीत्यलों
त्यस्य सत्वं सिद्धं भवति। एतदपि नास्ति प्रयोजनं। निर्दिश्यमानस्यादेशा भवंतीति विसर्जनीयस्यैव भ
विष्यति। द्विर्वचनं प्रयोजनं। उरः कः। उरः पः। अनचि च। अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं
सिद्धं भवति। स्थानिवद्भावप्रतिषेधश्च प्रयोजनं। यथेह भवति उरः केण उरः पेण अट्व्यवाय इति ण शिषः
त्वं। एवमिहापि स्थानिवद्भावात् प्राप्नोति। व्यूढोरस्केन महोरस्केनेति। तत्रानल्विधाविति प्रतिषेधः। सि

पूर्वत्रासिद्धे न स्थानिवदिति निषेधः। अचः परस्मिन्पूर्वविधावित्यस्य न तु स्थानिवदादेश इत्यस्य। ॥श्रीः॥ राम॥ श्रीकृष्णजी॥ राम॥

१७

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीमन्यस्यपि वर्णागमत्वं यत्नु विचार्यते। किंपुनरिति। पक्षद्वयेपि प्रतिवर्णं चिंतन्यनुसंधितानं विचारस्य प्रयोजनं। वर्णव्यत्यय इति। एकवर्णास्या

किंपुनरिमे वर्णा अर्थवंत आहोस्विदनर्थकाः। अर्थवंतो वर्णाः धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। धातव एकवर्णा अर्थवंतो दृश्यंते। एति। अध्येति। अधीत इति। प्रातिपदिकान्येकवर्णान्यर्थवंति। आभ्यां। एभिः। एषु। प्रत्यया एकवर्णा अर्थवंतः। औपगवः। कापटवः। निपाता एकवर्णा अर्थवंतः। अ अपेहि। इ इन्द्रं पश्य। उ उत्तिष्ठ। अ अपक्राम। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे अर्थवंतो वर्णा इति। वर्णव्यत्यये चार्थांतरगमनात्। वर्णव्यत्यये चार्थांतरगमनान्मन्यामहे अर्थवंतो वर्णा इति। कूपः सूपो यूप इति। कूप इति सककारेणैकः कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थांतरं गम्यते। यूप इति ककारसकारापाये यकारोपजनेऽर्थांतरं गम्यते। तेन मन्यामहे यः कूपे कूपार्थः सकारस्य सः। सूपे सूपार्थः स सकारस्य। यः यूपे यूपार्थः स यकारस्येति। वर्णानुपलब्धौ चानर्थगतेः। वर्णानुपलब्धौ चानर्थगतेर्मन्यामहेऽर्थवंतो वर्णा इति। वृक्षः ऋक्षः कांडीरः आंडीरः। वृक्ष इति सवकारेणैकः कश्चिदर्थो गम्यते। ऋक्ष इति वकारापाये सोऽर्थो न गम्यते। कांडीर इति सककारेणैकः कश्चिदर्थो गम्यते। आंडीर इति ककारापाये

पुपगमेन्यापगमो व्यत्ययः। सककारस्येति। तस्यैवान्वयव्यतिरेकावनुविधत्तेऽर्थ इत्यवसाय इत्यर्थः। वर्णानुपलब्धौ चेति। अर्थांतराव्यापारालक्षितोर्थो नगम्यते इति विवक्षितं॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वापिन्तरं तु गम्यता

भा॰कै॰ ३८

इतरस्त्वर्थावगत्यभाव मनेनोक्तमिति मत्वा पृच्छति। किं तर्हीति। साधीय इति। परस्तत्तापेक्षया प्रकर्षः आरोप्यते। यथा न किंचिद्रूपं करोत्युक्ते
कश्चिदाह सुतरामयं करोतीति। एवं तर्हीति। प्रकृतोर्थो न गम्यत इत्यर्थः। तस्यार्थ इति। वर्णस्य परं प्रति वर्णो नानर्थवत्त्व मासिद्धमिति
कथं तस्येति वर्णः परामृश्यत इत्याह। सोर्थ इति। प्रकृतोर्थ इत्यर्थः। उष्ट्रमुख इति। गता र्थत्वादप्रयोग एव द्वितीयमुखशब्दस्य लो

किं तर्ह्युच्यतेऽनर्थगतेरिति। न साधीयो ह्यत्रार्थस्य गतिर्भवति। एवं तर्हीदं पठितव्यं स्यात् वर्णानुप
लब्धौ चातदर्थगतेरिति। किमिदमतदर्थगतेरिति। तस्यार्थस्तदर्थः। तदर्थस्य गतिः तदर्थगतिः
न तदर्थगतिः अतदर्थगतिः। अतदर्थगतेरिति। अथवा सोर्थस्तदर्थः। तदर्थस्य गतिः त
दर्थगतिः न तदर्थगतिः अतदर्थगतिः। अतदर्थगतेरिति। सतार्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः।
उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवमतदर्थग
तेरनर्थगतेरिति। संघातार्थवत्त्वाच्च। संघातार्थवत्त्वाच्चानर्थका वर्णा इति। येषां संघा
ता अर्थवन्तः अवयवा अपि तेषामर्थवन्तः। येषां पुनरवयवा अनर्थकाः अवयवा अपि तेषाम
नर्थकाः। तद्यथा। एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थं। एकश्च तिलस्तै
लदाने समर्थः तत्समुदायश्चाखार्यपि तैलदाने समर्था॥

समुदाया

शिवः

पादीयते। अत्र ह्युष्ट्रमुखमस्येत्येवा विग्रहः। न चमुष्ट्रमाप्रागपं तरस्य मुखं भवतीति विशिष्टावयववृत्तिरुष्ट्रशब्दः सादृश्यान्मुखं विशिनष्टि
एवमिहाप्यनर्थगतेरित्यत्रार्थशब्देन प्रक्रांतोर्थ उच्यते। न भाष्यमात्रामित्यर्थः॥ ॥श्रीरामकृष्णोजयतु॥ श्री॥ रामजी॥ श्रीकृष्णजी॥ ॥

३८

© Dharmartha Trust J&K. Digitized by eGangotri

नलोपादीनीति। अवर्णविभक्तेर्न भवति। यतोयद्वैवावयवानां प्रातिपदिकसंज्ञा प्रवर्त्तते तद्वैव समुदायस्यापि। तत्र तदंतर्गतत्वाद्विभक्तेर्लु
का भवितव्यं। समासग्रहणेन च तुल्यजातीयस्य सर्वतावयवसमुदायस्य प्रातिपदिकसंज्ञा निवार्यते। तेनेन सार्थवत्समुदायमात्रस्य येनैवार्थे
न समुदायार्थवत्त्वं तेनैव तदवयवानामपीति विभक्त्युत्पत्तिश्चोद्यते। अत्र परिहारमाह। संघातस्येति। इह सूत्रे एकत्वं विभक्त्यार्थोत्य

येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा। एकोंधो दर्शनेऽसमर्थस्तत्स
मुदायश्च शतमप्यसमर्थं। एकाच सिकतातैलदानेऽसमर्थास्तत्समुदायश्च खारीशतमप्यसम
र्थं। यदि तर्हीमे वर्णा अनर्थकाः अर्थवत्कृतानि प्राप्नुवंति। कानि। अर्थवत्प्रातिपदि [struck through]
कमिति प्रातिपदिकसंज्ञा। प्रातिपदिकादिति स्वाद्युत्पत्तिः। सुबंतमिति पदसंज्ञा। तत्र को दोषः।
पदस्येति नलोपादीनि प्राप्नुवंति। धनं वनमिति। संघातस्यैकार्थ्यात्सुबभावो वर्णात्। संघात
स्यैकत्वमर्थः तेन वर्णात्सुबुत्पत्तिर्न भविष्यति। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः। अनर्थ
कास्तु वर्णाः। कुतः। प्रतिवर्णमर्थानुपलब्धेः। न हि प्रतिवर्णमर्था उपलभ्यंते। किमिदं प्रतिवर्ण
मिति। वर्णं वर्णं प्रति प्रतिवर्णम्॥

ते। तच्चैकमित्येकविभक्तिरुत्पद्यते। यथा बहवो द्रष्टारः दृश्यमर्थमेकेनैव प्रदीपेन पश्यंति। साचोत्पद्यमाना समुदायादेव तंत्रेण सर्वाननु
गृह्णाति एवमुत्पद्यते। समुदायद्विर्वचनवत् पदसंज्ञा तु समुदायस्यैव भवति न प्रत्येकं [struck through] यस्मात्प्रत्ययविधिरित्यनुवर्त्तना
दसुबंतत्वात्। अनर्थकास्त्विति। धात्वादिव्यतिरिक्ता वर्णाः पक्षीक्रियंते। अन्यथा शास्त्रविरोधः प्राप्नोति। किमिदमिति। असमासशंकया
प्रश्नः। समासेनुत्तरं। तेनैव वीप्सायामिति तेनेति द्विर्वचनं न भवति॥

© Dharmartha Trust J&K. Digitized by eGangotri

मा॰के॰

वर्णव्यत्ययेति। यदुक्तं वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेरिति तस्यैकान्तिकत्वमुद्भाव्यते। उभयमित्याहेति। यत्रा

३९

39

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्या
महेऽनर्थका वर्णा इति। वर्णव्यत्यये। कृतेस्तर्कः। कसेः सिकताः। हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्य
यः। अपायो लोपः। घ्नन्तीति घ्नन्तु अघ्नन्। वर्णापायो नार्थापायः। उपजन आगमः। लविता। लवितुं। वर्णो
पजनो नार्थोपजनः। विकार आदेशः। घातयति। घातकः। वर्णविकारो नार्थविकारः। यथैव
वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यं। न चेह तद्वत्। अ
तो मन्यामहेऽनर्थका वर्णा इति। उभयमिदं वर्णेषूक्तं। अर्थवन्तोऽनर्थकाश्चेति च। किमत्र न्याय्यं। उभ
यमित्याह। कुतः। स्वभावतः। तद्यथा। समानमीहमानानां चाधीयानानां। केचिदर्थैर्युज्यन्ते अपरे न।
न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं। कश्चिद्वानर्थक इति सर्वैरनर्थकैः। त
त्र किमस्माभिः शक्यं कर्तुं यद्धातुप्रत्ययप्रातिपदिकानिपाता एकवर्णा अर्थवन्तः। अतोऽन्येऽनर्थ
का इति स्वाभाविकमेतत्। कथं यदेष भगवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः। अर्थवन्तो
वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपल

शिवः

न्वयव्यतिरेकाभ्यामर्थवत्ता शक्यते कल्पयितुं नचैवासावभ्युपगन्तव्या न सर्वत्रेत्यर्थः॥ ॥श्रीः॥ ॥रामजी॥ श्रीकृष्णजी॥ श्रीः॥ १९

© Dharmartha Trust J&K. Digitized by eGangotri

संघातांतराणीति। तदुक्तं। न कूपसूपयूपानामन्वयोर्थस्य विद्यते। अतोर्थांतरवाचित्वं संघातस्यैव गम्यत इति। एतेनापीति। दृष्टोपि तदर्थे
न गुणेन गुणिनोर्थ एवं जातसुरंगवदृष्यांगवच्चेति। आचारादिति। आचारो व्यवहारः। तं पिप्पलिकेषुरिति य एन कृतः। अप्रधानत्वादिति। प्रधाना

संघातांतराण्येवैतान्येवंजातीयकानि अर्थांतरेषु वर्त्तंते। कूपः सूपो यूप इति। यदि हि वर्णव्य
त्ययकृतमर्थांतरगमनं स्याद्भूयिष्ठः कूपार्थः सूपे स्यात् सूपार्थश्च कूपे कूपार्थश्च यूपे यूपार्थश्च कू
पे यूपार्थश्च सूपे। यतस्तु खलु न किंचित् कूपस्य वा सूपे यूपस्य वा कूपे कूपस्य वा सूपे अतो मन्या
महे संघातांतराण्येतान्येवंजातीयकान्यर्थांतरेषु वर्त्तंत इति। इदं खल्वपि भवता वर्णानामर्थव
त्तां ब्रुवता साधीयोनर्थकत्वं द्योतितं। यो हि मन्यते यः कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः
सकारस्य यो यूपे यूपार्थः स यकारस्येति। उपशब्दस्तस्यानर्थकः स्यात्। तत्रेदमपरिहृतं सं
घातार्थवत्त्वाच्चेति। एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति। अइउण् ऋऌक् एओङ्
ऐऔच्। प्रत्याहारेनुबंधानां कथमज्ग्रहणेषु न। य एते चतुर्दश प्रत्याहारार्था अनुबंधाः क्रियंत एतेषा
मज्ग्रहणेन ग्रहणं कस्मान्न भवति। किं च स्यात्। दधि णकारीयति मधु णकारीयति इको यणचीति
यणादेशः प्रसज्येत। आचारात्। किमिदमाचारादिति। आचार्याणामुपचारात्। नैतेष्वाचार्या अच्का
र्याणि कुर्वंतः। अप्रधानत्वात्। अप्रधानत्वाच्च। न खल्वप्येतेषां प्राधान्येनोपदेशः क्रियते। कुतर्हि

प्रधानसन्निधावप्रधानमेव कार्याणां प्रयोजकमिति परार्थानामनुबंधानामच्संज्ञा न प्रवर्त्तत इत्यर्थः॥ ॥श्रीः॥ रामकृष्णोजयतः॥

© Dharmartha Trust J&K. Digitized by eGangotri

शैलीति। शीलेभवा शैली समवधानपूर्विका प्रवृत्तिः। यथा लोके आलूएोः सहआलूणमोऽयंनेष्ठक्रियैः सरु साश्रियाश्चेति। एवमिहाप्याचार्येणाव
र्णानिर्दिष्टाइत्यर्थः। लोपश्चेति। परत्वान्नित्यत्वाच्च। आदिरंत्येनेत्यनेना संज्ञाविधानकालेऽनुबंधानां लोपात्संनिधानात्संज्ञानप्रवर्त्तते। अनु
बंधायुच्चारणाएवसंति। इत्संज्ञाप्रतिबद्धं कार्यमसंत एवप्रतिपादयंति। स्वतस्तुन किंचित्कार्यं प्रतिप[illegible]द्यंते। ऊकालोऽजिति। सिद्धे इत्ये

एषाह्याचार्यस्य शैली लक्ष्यते। यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति। अचोऽच्सु हलोहल्सु। लोपश्च बलवत्तरः॥
लोपः खल्वपि तावद्भवति। ऊकालोऽजिति वाप्यागमकालानां यथा भवेत्। अचांग्रहणमच्कार्यं तेनेमां
नभविष्यति। अथवा योगविभागः करिष्यते। ऊकालो च्। उऊऊ३ इत्येवं कालोऽज्भवति। ततो ह्रस्वदीर्घप्लु
तसंज्ञश्च भवति। ऊकालोच्। एवमपि कुक्कुट इत्यत्रापि प्राप्नोति तस्मात्पूर्वोक्त एव परिहारः। एषएव
चार्थः। अपर आह। ह्रस्वादीनां प्राग्यावत्तावदेव योगो स्तु। अच्कार्याणि यथास्युः। तत्कालेष्वस्तुकार्या
णि। अथ किमर्थं मंतस्यानाप्यमुपदेशः क्रियते। इह सय्यंता सवत्सरः। यल्लोकं तल्लोकमिति प
रसवर्णस्यासिद्धत्वादनुस्वारस्य वा द्विर्वचनं। तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन
ग्रहणात्पूर्वस्यापि परसवर्णो यथास्यात्। नैतदस्ति प्रयोजनं। वक्ष्यत्येतत्। द्विर्वचने परस
वर्णत्वं सिद्धं वक्तव्यमिति। यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति। परसवर्णेतर्हि कृते

योगविभागे नकालविशेषावच्छिन्नस्यास्वंनिषध्यते। ततोऽनुबंधानामकालत्वाभावादत्वाभावः। एवमपीति। ककारा कृते रूपदेशान्मात्रिकस्याच्त्वं मन्यते। अ
त्रचयद्यप्ययंपरिहारोऽस्ति तथापि तोककाभेनच वर्णद्वये नैकाजातिर्व्यज्यते इति। तथापि पूर्वमेव मात्राकालोऽत्रगम्यते न च मात्रिकं व्यंजनमस्तीत्युक्तत्वा
त्पुनरिह नो कः। अथ किमर्थमिति। अनुदित्सवर्णस्येति कस्मान्नकृतमिति प्रश्नः। इह एग्रहणोग्रहणार्थं स्वंतस्थानामत्रावश्यकर्त्तव्यउपदेशः। गौर्हिसादे
मूर्द्धन्यो यथास्यादिति॥

शिवः
२०

© Dharmartha Trust J&K. Digitized by eGangotri

ननु च भेद इति। कृतिकृतोस्य भेदः सूक्ष्मत्वात्तु दुर्लक्ष्यः। तदेतदिति। ज्ञापकं समस्य विचारयति। आचार्योपदेशपारंपर्यात्तु ज्ञायते अनु

माभूत् द्विर्वचनं। ननु च भेदो भवति। सति द्विर्वचने त्रियकारकं असति द्विर्वचने द्वियकारकं। ना

स्ति भेदः। सत्यपि द्विर्वचने द्वियकारकमेव। कथं हलो यमां यमि लोप इत्येवमेकस्य लोपेन भवित

व्यं। एवमपि भेदः। सति द्विर्वचने कदाचिद्द्वियकारकं कदाचित्त्रियकारकं। असति द्वियकारकमे

व। स एष कथं भेदो न स्यात्। यदि नित्यो लोपः स्यात्। विभाषा च स लोपः। यथा ऽभेदस्तथास्तु। अनु

वर्त्तते विभाषा शरोऽचि यद्वारयस्य यद्द्वित्वं। यदयं शरोऽचीति द्विर्वचनप्रतिषेधं शास्ति। तज्ज्ञापयत्या

चार्यः। अनुवर्त्तते विभाषेति। कथं कृत्वा ज्ञापकं। नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित् स्यात्। यदि

नित्यो लोपः स्यात्प्रतिषेधवचनमनर्थकं स्यात्। अस्त्वत्र द्विर्वचनं। झरो झरि सवर्णे इति लोपो भ

विष्यति। पश्यति त्वाचार्यः विभाषा स लोप इति। ततो द्विर्वचनप्रतिषेधं शास्ति। नैतदस्ति ज्ञापकं।

नित्ये हि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः। यदेतदचो रहाभ्यामिति द्विर्वचनं लोपापवादः स विज्ञा

यते। कथं। परश्च कचाने। एतावंतश्च यरः। यकुलक्षरो वा यमो वा यादि चात्र लोपः स्याद्द्विर्वचनमन

र्थकं स्यात्। किं तर्हि तयोर्योगयोरुदाहरणं यत्र कृते द्विर्वचने त्रिव्यंजनः संयोगः। प्रत्तं अवत्तं आ

दित्यः। इदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्याल्लोपो न भवति। एवमिहापि लोपो न स्यात्कर्षति इ

वर्त्तते विभाषेति। तस्माद्द्विव्यंजनसंयोगस्य वर्णायाः एवं इति एकारे एष प्रत्याहारः कृतो न चकारेणेति स्थितं॥

© Dharmartha Trust J&K. Digitized by eGangotri

लएर॥ ॥संदेहो भवतीति। किं प्रत्यासत्तिराश्रीयते ऽथ व्याप्तिरिति संदेहः। नहि केपर इति। नन्वल्लोपानुपानकेति ह्रस्वकर्त्र

ददृ

लएर॥ ॥अयं णकारो द्विरनुबध्यते। पूर्वश्चैव परश्च। तत्राणग्रहणेषु चिणग्रहणेषु च सन्देहो भवति पूर्वेण वा स्युः परेण वेति। कतरस्मिंस्तावदण्ग्रहणे सन्देहः। ढ्रलोपे पूर्वस्य दीर्घोऽण इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नहि ढ्रलोपे परेणाः संति। ननु चायमस्ति। आतृ ऊ आरृ इति। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। ढ्रलोपे पूर्वस्य दीर्घोऽच इत्येव ब्रूयात्। अथ वैतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः। केऽण इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नहि के परेणाः संति। ननु चायमस्ति गोकानौ केति। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। केच इत्येव ब्रूयात्। अथ वैतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः। अणोऽप्रगृह्यस्यानुनासिक इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्॥

ग्यनेहाघत्यस्यासिद्धत्वाद्धस्ति केपरलोपः कारः॥ अत्राहुः। नमुन इत्यत्र नेति योगविभागेन घत्वादीनामसिद्धत्वाभावाच्चेषु चकृते

तपरभीवा इत्यादौ न रेफः

© Dharmartha Trust J&K. Digitized by eGangotri

नहिपदांताइति। ननुच भो भगोइत्यत्राभ्रम्ग्रहणस्य प्रयोजनं वक्ष्यते। रक्षार्थं करणेतीसत्र हलि सर्वेषामिति लोपो भाभ्रत्त्इति। तत्कथ
मुच्यते नहिपदांताइति। उच्यते। अप्रगृह्यस्येति पर्युदासेनाचएवानुनासिकेन भाव्यं न तु हल इत्युक्तं नहिपदांताः कार्यभाज इत्य
र्थः। अचोप्रगृह्यस्येति। हलो हि न भाव्यमित्यत्राणस्त्र हणसामर्थ्यात्पूर्वेणेति स्पितं। तत्रवृत्तं वृ ध्यतीति। किंपि कृते वृक्षवृश्च

नहिपदांताः परेणः संति। ननु चायमस्ति। कर्त्तृहर्त्तृ एवं तर्हि सामर्थ्यात्पूर्वेणा न परेण। यदिहि परे
णस्यात् अणस्य हणमनर्थकं स्यात्। अचोप्रगृह्यस्यानुनासिक इत्येव ब्रूयात्। अपवे तदपिन
ब्रूयात्। अचएवहि प्रगृह्या भवंति। अस्मिंस्तु र्घेणग्रहणेसन्देहः उरणपर इति। असिद्धिर्घंपू
र्वेणा न परेण। कुतः एतत्परा भावात्। नस्तुः स्थाने परेणः संति। ननु चायमस्ति। कर्त्तृर्घंहर्त्तृर्घं
मिति। किंञ्च स्यात्। पद्यत्र रपरत्वं स्यात्। ह्वयोरेफयोः अवर्णाप्रसज्येत। हलोयमांयमि
लोपइत्येवमेकस्यात्र लोपो भविष्यतीति विभाषा सलोपः विभाषाश्रवर्णाप्रसज्येत। अयं त
र्हि नित्यो लोपः रा रीति। पदांतस्येत्येवसः। नशक्यः सपदांतस्येत्येव विज्ञातुं। इष्टहि लोपो नसा
दाजर्घ्घेल्लङ्। अजर्घाः। पास्पर्द्धः। अपास्पाइति॥

माचष इतिणिचि टिलोपश्चकते रक्षन्नयते विचिकतेरसवइति भव
माचष इति णिचि टिलोपश्च कते रक्षन्वयते विचि कतेरसव इति भव ति। किंपि तु क्कौ लुप्तं कौ विधिं प्रति च नस्थानिवद्भिति निषेधात्संप्रसारणाप्रसंगः। लोपो व्योर्वलीति लोपप्रसंगश्च। विचितु स्थानि
वद्भावाद्वल्निमित्तो लोपो न भवति। हलि सर्वेषामित्यनेन तु लोपे क्रियमाणे पूर्वत्रासिद्धे न स्थानिवद्भिति स्थानिवत्वनिषेधाद्
लोपः आप्नोत्यग्रहणानुवृत्त्या निवर्त्यते। अजर्घाइति। गृधेर्यङ् रुगागमेभ्यासस्य कृते लङि सिपि शब्लुकि गुणारपरत्वे सिप्लोपमष्टा

© Dharmartha Trust J&K. Digitized by eGangotri

इहापि तर्हीति। धातुग्रहणोन्नद्दिलिङ्गेन धातोरेव रपरत्वं निवर्तितं। धातोस्तु रपरत्वे सत्यनन्त्यत्वान्न प्राप्नोतीति प्रश्नः। इहापीति। त
स्माद्धातुग्रहणस्य सप्रयोजनत्वान्न ज्ञापकत्वमिति सर्वः। सवर्णे इति। प्रचीकृतदिति ऋकारस्य ऋकार एव यथा स्यात् लृकारोऽपा

इह तर्हि मातॄणां पितॄणामिति रपरत्वं प्रसज्येत। आचार्यप्रवृत्तिर्ज्ञापयति नात्र रपरत्वं भव
तीति। यदयम् ऋत इद्धातोरिति धातुग्रहणं करोति। कथं कृत्वा ज्ञापकं। धातुग्रहणस्यैतत्प्रयोज
नं इह माभूत्। मातॄणां पितॄणां इति। यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात्। रपर
त्वे कृतेऽनन्त्यत्वादित्वं न भविष्यति। पश्यति त्वाचार्यः नात्र रपरत्वं भवतीति ततो धातुग्रहणं
करोति। इहापि तर्हि इत्वं न प्राप्नोति। चिकीर्षति जिहीर्षतीति। मा भूदेवं। उपधायाश्चेत्येवं भ
विष्यति। इहापि तर्हि प्राप्नोति मातॄणां पितॄणामिति। तस्मान्नात्र धातुग्रहणं कर्त्तव्यं। एवं त
र्हि सामर्थ्यात्सवर्णेन न परेण। यदि परेण स्याद् अणग्रहणमनर्थकं स्यात्। उरण्रपर इत्येव
ब्रूयात्। अस्मिंस्तर्हि अणग्रहणे संदेहः। अणुदित्सवर्णस्य चाप्रत्यय इति। असंदिग्धं परे
ण न पूर्वेण। कुत एतत्। सवर्णेऽणग्रहणं लपरं च ऋलृत्। यदयमुर्ऋदित्यकारे तपरकरणं

शिवः

करोति एवमर्थं तपरत्वं क्रियते। यदि च पूर्वेणाणा ऋकारे अण्ग्रहणं स्याद् ऋकारेण एवाङ्गिलृकारस्य ग्राहक एव न भवतीति ऋकारे
नैव स्थानी नाप्यादेशः प्रसज्यतीति किं तपरत्वेन। कृतं च तज्ज्ञापकं परेणाणग्रहणस्य॥ ॥श्रीः॥ ॥रामजी कृष्णजी। गोविदजी॥

© Dharmartha Trust J&K. Digitized by eGangotri

अर्द्धचतस्र इति। अर्द्धं च चतस्रः। चतुर्थी हि मात्रा तत्रार्द्धमिति। किंपुनरिति। यत्र लोपस्तत्र वर्णच्छेदः। वर्णान्तरमनुबंधः। किं नाक्रिय

ग्रहणं ग्रहणेषु तर्हि संदेहः। असंदिग्धं परेण न पूर्वेण। कुत एतत्। उभयोरन्यत्र परेण स्यात्। यत्रेच्छ-
ति पूर्वेण संप्रत्ययग्रहणं तत्र करोति चोरिति। न च गुरु भवति। कथं कृत्वा ज्ञापकं। तत्र विभक्ति-
निर्देशे संप्रत्ययग्रहणे अर्द्धचतस्रो मात्राः। अस्याहरुग्रहणे पुनस्तिस्रो मात्राः। सोयमेवं लघी-
यसा न्यासेन सिद्धे सति यज्जरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः परेण न पूर्वेणेति।
किंपुनर्वर्णोत्सत्त्वा विवायं णकारो हि रनुबध्यते। एतज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा
व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। अणुदित्स[illegible] पूर्वेण ग्रह-
णं परेण ग्रहणमिति व्याख्यास्यामः॥ ॥ञमङणनम्॥ ञ म ङ॥ ॥किमर्थमिमे मुखनासिका-
वचनावुभावनुबध्यते। ञकारस्य वानुबध्येत। कथं यानि मकारेण ग्रहणानि हलो यमां यमि लो-
प इति। संतु ञकारेण हलो यञां यञि लोप इति। नैवं शक्यं। ञकारमकारपरयोरपि ञकारम-
कारयोर्लोपः प्रसज्येत। ञकारमकारो ञकारमकारयोस्तु। कथं पुमः खय्यमपर इति। एतदप्य-
स्तु ञकारेण पुमः खय्यञ्परे इति। नैवं शक्यं। ञकारमकारपरे

तेऽप्यर्थः। व्याख्यानतः इति न्यायात् [illegible]
क्विरनुसरणीये लर्यः॥ ॥ञमङ्॥ ॥ञकार इति। मकारस्य पदान्तस्य अपरत्वेन भाव्यमिति तस्याभावः। उञ्ञो ञकारः संयोगान्तस्येति लु

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰कै॰

५३

सन्तु॰ तावदिति। उद्देशानुदेशाभ्यां संख्यासाम्याद्यथासंख्येन ञ्येयस्यागमस्यागमी विद्यते स प्रवर्त्तते नान्य इत्यर्थः। किमिद
मिति। अक्षरसमाम्नाय इति व्यवहारयोर्वा इमां स्वरशोऽक्षरश इति चोक्तत्वादस्मः। अक्षरं न क्षरमिति। क्रियाशब्दोऽयं ति यस्या
र्थस्य वाचक इति दर्शयति। अत्रासियः क्षरतेर्वा विनाशार्थस्य नञ्पूर्वस्य रूपं। तच्च ब्रह्मतत्त्वं परमार्थतो नित्यं। व्यवहारे नित्य

कथं ङमो ह्रस्वादचि ङमुण्नित्यमिति। एतदप्यस्तु अकारेण ङमो ह्रस्वादचि ङमुण्नित्यमिति। नैवं शक्यं
[illegible] ञकारमकारयोरपि हि पदांतयोर्ङकारे मकारावागमौ स्यातां। न तु ञकारमकारौ प
दांतौ स्तः। एवमपि पंचागमास्त्रय आगमिनः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। संतु तावद्येषा
मागमानामागमिनः संति। ञकारमकारौ पदांतौ न स्त इति कृत्वा आगमावपि न भविष्यतः। अ
थ किमिदमक्षरमिति। अक्षरं न क्षरं विद्यात्। न क्षीयते न क्षरतीति वा अक्षरं। अश्नोतेर्वा स
रोऽक्षरं। अश्नोतेर्वा पुनरयमौणादिकः सरन्प्रत्ययः। अश्नुते इत्यक्षरं। वर्णं वाहुः पूर्वसू
त्रे। अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते। किमर्थमुपदिश्यते। अथ किमर्थमुप
देशः क्रियते। [illegible] ॥ ॥

शिवः

तयानु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा। अश्नोतेर्वेति। सरन्प्रत्ययस्यानुबंधलोपे कृते
अनुकरणं सर इति। तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं पदं वाक्यं वा। वर्णं वाहुरिति। रूढिरियं वर्णस्येत्यर्थः। पूर्वसूत्रे इति। व्या
करणांतरे वर्णमक्षराणीति वचनात्। किमर्थमिति। वर्णानां साधुत्वस्य प्रतिपाद्यत्वात्पदस्यैव साधुत्वान्वाख्यानादस्मः॥

२३

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णज्ञानमिति। वर्णा येन शास्त्रेण ज्ञायंते लघु[illegible]चो विषयः शास्त्रेण वाग्विधीयते। आवध्यते। शास्त्रेण तस्याः परिज्ञानादित्यर्थः
यत्र चेति। ब्रह्म वेदः। पदे वर्त्तते तस्य च शास्त्रं विषय[illegible] लौकिकानां वैदिकानां च शास्त्रं विषय इत्यर्थः। तदर्थमिति शास्त्रप्र
वृत्त्यर्थमित्यर्थः। इष्टबुद्ध्यर्थमिति। कलादिदोषरहितवर्णज्ञानार्थमित्यर्थः। लघ्वर्थमि[illegible] अनुबंधकरणार्थमित्यर्थः।
वाक्समाम्नाय इति। एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थः। पुष्पितः फलित इति। दृष्टादृष्टफलाभ्यामभ्युदयनिःश्रेयसाभ्यां

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्त्तते। तदर्थमिष्टबुध्यर्थं लघ्वर्थं चोपदिश्यते। सोयमक्ष
रसमाम्नायो [illegible] वाक्समाम्नायः पुष्पितः फलितश्चंद्रतारकवत्प्रतिमण्डितो वेदित
व्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे
लोके महीयेते॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथम
स्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥श्री॥ ॥राम॥ श्रीकृष्णजी॥ रामकृष्णो॥

च। चंद्रतारकवदिति। अनादित्वान्नित्यत्वं वाग्व्यवहारस्य सूचयति। ब्रह्मराशिरिति। ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभाती
त्यर्थः। सर्ववेदेति। सर्ववेदाध्ययनकृतस्य पुण्यस्य यत्फलं तत्प्राप्नोतीत्यर्थः। मातापितराविति। माहात्म्यातिशयः शास्त्र
स्य प्रत्याहारमात्रफलाख्यानद्वारेणान्वाख्यातो। महीयेते इति। महीयशब्दः कंड्वादिषु गतः॥ ॥इत्युपाध्यायजैयटपु
त्रकैयटकृते प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं। संवत् १८७६

© Dharmartha Trust J&K. Digitized by eGangotri

२३ आह्निकम



© Dharmartha Trust J&K. Digitized by eGangotri